RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेबसाइटः www.sanskritsamvad.com मूल्यम्-रू. ५/-

॥ ओ३म् ॥

जलबिन्दुनिपातेन क्रमशः
पूर्यते घटः।
स हेतुः सर्वविद्यानां
धर्मस्य च धनस्य च॥

( चाणक्य-नीति )

॥ ओ३म् ॥

वयसः परिणामेऽपि यः
खलः खल एव सः।
सुपक्वमपि माधुर्यं
नोपयातीन्द्रवारुणम्॥

( चाणक्य-नीति )

卐 वर्षम्-६ 卐 अंकः-२३ (१४३) 卐 १ जूनमासः २०१७तः १५ जूनमासः २०१७ पर्यन्तम् 卐 विक्रमसंवत्-२०७४ 卐 सृष्टिसंवत्-१,९६,०८,५३,११५ 卐 पृष्ठम्-८

## देशस्यात्मनः संस्कृते वासः-प्रो. पाठक

नैनीताल-कुमाऊ विश्वविद्यालये संस्कृत विभागेनायोजितं संस्कृत साहित्ये राष्ट्रीय भावनायाः विषयायोजितं द्विदिवसीय राष्ट्रीयसंगोष्ठ्याः समापनमभवत्। संगोष्ठ्यां त्रिषु सत्रेषु 63 शोधपत्राणि पठितानि। डॉ. विनय विद्यालंकार डॉ. श्वेता शर्मा डॉ. लज्जा भट्ट च सत्राध्यक्षतां कृतवन्तः। संगोष्ठ्यां प्रस्तुत्याधारे शोधार्थिन् पुरस्कृतमपि कृतम्।

समापन समारोहस्याध्यक्षतां कुर्वन्तः शोध निदेशक प्रो. मानवेन्द्र पाठकोक्तवान् यत संस्कृतैका समृद्ध भाषा वर्तते यस्यां देशस्यात्मा निवासं करोति। मुख्यातिथि पूर्व विभागाध्यक्ष प्रो. जयदत्तोप्रैतिः भणितं यत् वेदाःमानवतायाः जननी वर्तन्ते। वेदज्ञानस्यापूर्वा राशी वर्तते। विशिष्टातिथिः प्राचार्य डॉ. बीडी कांडपाल महोदयोक्तवान् यत् शीलेच्छाशक्ति कर्मशक्तिः कारणादैव संस्कृतभाषा सुदृढा वर्तते। संगोष्ठ्यायोजक प्रो. जया तिवारी सर्वेषां धन्यवादं कृतवती। प्रो. ललिता तिवारी आयोजन समित्यां प्रति सर्वेषामाभारं व्यक्तं कृतवती। अवसरेऽस्मिन् शोधकर्ता मृगांक रुचि जायसवालश्च स्वविचारं प्रस्तुतवत्यौ। संचालन डॉ. विनय विद्यालंकारः कमला पंत च कृतवती। संगोष्ठ्यां शोध पत्रप्रस्तुत्याधारे महेशनोटियाल प्रथम कैलाश सनवाल द्वितीय संदीप पांडे च तृतीय स्थानं प्रातवन्तः।




अवसरेऽस्मिन् प्रो. जयदत्त उप्रेती प्रो. मानवेन्द्रपाठक प्रो. किरण टंठन प्रो. बीडी कांडपाल महोदयाः अपि सम्मानं प्राप्तवन्तः। संगोष्ठ्यां संस्कृतस्य श्लोकमन्त्रश्रीमदभगवत् गीतायाः श्लोकानामुपरि चर्चा जाता।

समापन समारोहे डॉ. सचेतन साह, डॉ. शिवांगी चन्याल, डॉ. सुषमा जोशी ब्रजमोहनोप्रेती सहितमनेके जनाः उपस्थिताः आसन्।

## अन्तर्विद्यालयीया संस्कृत-वार्तावतारण-प्रतियोगिता समनुष्ठिता

नवदिल्ली। नवदिल्यां सम्प्रति वार्ता। इति नाम्ना संस्कृतसमाचार वाचनप्रतियोगिता समायोजिता। प्रतियोगितायामस्यां छात्रैः संस्कृतस्य पृथक् पृथक् वार्तानां वाचनमभिप्रस्तुतम् । अथ च अस्यां प्रतियोगितायां दिल्ल्याः प्रतिष्ठितानां द्वादश विद्यालयानां छात्राः प्रतिभागित्वेन उपस्थिताः अवर्तन्त। ध्येयमस्ति यत् प्रतियोगितायामेतस्यां द्वादशविद्यालयानां षष्ट्यधिकाः विद्यार्थिनः भागमभजन्त।



अथ च प्रतियोगितायां आर के पुरमस्थः डी. पी.एस. विद्यालयीयाः छात्राः प्रथमम्, पूसा रोड स्थस्य रा मजस पब्लिक विद्यालयस्य छात्राः द्वितीयम् , द्वारकोपनगरस्थस्य बाल भारती पब्लिक विद्यासलयस्य च छात्राः तृतीयं स्थानमधिगतवन्तः।

अवसरेह्यस्मिन् निर्णयमण्डले डॉ. सुनीता गेहानी वर्या, श्रीमती पूनम शर्मा महोदया च अवर्तन्त। अत्रावसरे निर्णयमण्डलीया सदस्या डॉ. सुनीता गेहानी महाशया प्रत्यपादयत् यत् अद्यतने आधुनिके युगे संस्कृत भाषा वैश्विकभाषायाः स्वरूपे परिवर्तते सर्वत्र विश्वस्तरे संस्कृतस्य लोकप्रियता संवर्धते, अतः संस्कृत भाषायाः संवर्धनाय अनुसंधानाय च नवयुवकानाम् अतोऽपि समेधनस्य आवश्यकता वर्तते। प्रतियोगितायाः प्रारम्भः मातुः सरस्वत्याः वन्दनापूर्वकं सरस्वत्याः मूर्तौ माल्यार्पणेन दीपप्रज्वलनेन सह सञ्जातः। अस्य नूतनकार्यक्रमस्योपक्रमस्य स्वरुपस्य च संकल्पना डॉ. ज्योत्स्ना श्रीवास्तव वर्यया श्री युवराजभट्टराई महोदयद्वारा च विहिता आसीत्। आयोजनमिदमत्यन्तं सफलं शलाघ्नीयम् कतिपयपक्षैश्च आश्चर्यकरं च अवर्तत। अद्य यावत् प्रायः सर्वेषु विद्यालयेषु समायोज्यमानेषु, समायोजयिष्यमाणेषु च संस्कृतस्य पारम्परिक प्रतियोगिताभ्यः पृथग्भूय संस्कृतमाधुनिकतया संयोजनदृशा कार्यक्रमोस्यमत्यन्तमेव सान्दर्भिकः उपयुक्तश्च संसिद्धः। कार्यक्रमस्य सफलायोजने दीपककुमारशर्मणः महद् योगदानम् आसीत्।

न्यू राजेन्द्रनगरस्थितेन बालभारती पब्लिक विद्यालयेन एव सम्प्रति वार्ताः इति नाम्ना संस्कृतसमाचार वाचनप्रतियोगिता समायोजिता आसीत् ।

## 10 दिवसीय संस्कृत संभाषण शिविररस्य समापनमभवत्

दिल्ली संस्कृतादमी संस्कृत शिक्षकसंघयोः संयुक्त तत्वाध नियायोजितम् 10 दिवसीय संस्कृत सभाषण शिविरस्य समापनम् मईमासस्य 22 दिनांके शाहदरास्थ ज्ञानदीप मॉडल विद्यालये सफलतया भवत्। शिविरेऽस्मिन् 205 छात्र-छात्राः भागम् ग्रहितवन्तः। गतवर्षे एषा संख्या 75 आसीत्। शिविरसंयोजक श्री संदीप कुमार उपाध्यायेन सूचितं यदस्मिन् वर्षे छात्राः संस्कृत संभाषण कर्तुम् अत्युत्सकाः आसन् पंजीकरणाय तु प्रायशः 400 जनाः बालाः च आगतवन्तः। किन्तु स्थानाभाव कारणात् अस्माभिः केवलं 205 बालानामेव पंजीकरणं कृतम्।

शिविर समापन कार्यक्रमस्याध्यक्षतां कुर्वन्तः डॉ. ब्रजेश गौतम् महोदयेन भणितं यत् समाजोत्थाने संस्कृत सभाषण शिविराणां महतो आवश्यकता वर्तते। यतोहि यावत् जनाः अस्माकमाधार भाषा संस्कृतातेव परिचितं न भविष्यन्ति तावदस्माकं संस्कृत्याधारभूताः वेदाः उपनिषदादि ग्रन्थानामध्ययने कथं करिष्यन्ति ते। अतः संस्कृत शिक्षक संघेन निश्चितं कृतं यद् वयं संस्कृतान्दोलनेन सह संस्कृत भाषायाः कृते मूलं कार्यं संभाषणमपि करिष्यामः।



संस्कृत संभाषण शिविरस्यसमापन कार्यक्रमे बालैः नेकाः कार्यक्रमाः प्रस्तुताः कार्यक्रमेषु संस्कृत गिद्दासंस्कृत नृत्यनाटिका-रोगी चिकित्सक संवादः-गृहसंवादः-ज्योतिषसंवादः-संख्यागणना-शिविरगीतादि प्रमुखाः आसन्। कार्यक्रमे आर्यसमाज मानसरोवर पार्क शाहदरा प्रधान श्री जगदीश प्रसाद शर्मा आर्यसमाज रोहताश नगरस्य प्रधान श्री रामपाल पाञ्चाल आर्य वैद्यशाला कोट्टकलस्य श्री रोहितार्य राजकीय विद्यालयस्य श्री शक्तिसिंहः दिल्ली वि.विद्यालयस्य कु. आंचल शर्मा संस्कृत संभाषण शिविर शिक्षिका कु. प्रीति सिंह. आग्लाध्यापकः श्री सिद्धार्थ अग्रवालः हिन्दी शिक्षिका श्रीमती पूजा उपाध्यायादयः जनाः उपस्थिताः आसन्।

## सी बी एस् ई द्वादशकक्ष्याफलम् रक्षा गोपालः प्रथमस्थाने ( प्रथमराङ्कू जेत्री )

नवदिल्ली । अद्य प्रख्यापिते सी बी एस् ई द्वादशकक्ष्याफले नवनवति-दशांशं षट् ( 99.6 %) प्रतिशतम् अङ्कैस्सह रक्षा गोपालः राष्ट्रेप्रथमस्थानीया अभवत् ।नोयिडायाम् अमिट्टि अन्ताराष्ट्रविद्यालयस्य मानविकशास्त्रविभागे विद्यार्थिनी भवति रक्षा । नवनवतिः दशांशं चत्वारि प्रतिशतम् ( 99.4 %) अङ्कान् प्राप्य चण्डिगडस्थे डी ए वी विद्यालयस्य भूमिः सावन्तः द्वितीयस्थाने आगता । चण्डिगडे एव भवन्स् विद्यामन्दिरस्य आदित्य जैनः नवनवतिः दशांशं द्वे प्रतिशतम् (99.2 %) अङ्कान् प्राप्य तृतीयस्थाने च विराजते ।अधिकाङ्कदानेन एव द्वादशकक्ष्याफलम् प्रसिद्धीकृतम्। द्व्यशीतिप्रतिशतम् ( 82%) छात्राः उन्नतशिक्षायै योग्यताम् आर्जितवन्तः ।उपरिपठनावसरम् बाधते इत्यतः अधिकाङ्कदानमसमापननिर्णयः आगामिवर्षादारभ्य स्वीकुर्यात् इति न्यायालयनिर्देशः ।

# ‘एवरस्ट्’ शृङ्गस्य कश्चन भागः भग्नः पतितश्च इति पर्वतारोहकाः

काठ्मण्डुः ‘एवरस्ट् शृङ्गात् कश्चन भागः भग्नः पतितश्चेति पर्वतारोहकाः। त्रिपञ्चाशदुत्तरनवदशशततमे प्रथमतया एवरस्ट् आरूढवन्तः एड्मण्ड् हिलरी तथा टेन्सिंहः नोरगे च यत्र पादं स्थापितवन्तः सः भागः एव विनष्टः। हिलरीस्टेप् (पादः) इति स्थानमिदम् आहूयते । पञ्चदशोत्तरद्विसहस्रतमे नेपाले प्रवृत्तभूकम्पात्परमेव भागेयम् विनष्टः इति पर्वतारोहकाः चिन्तयन्ति। एवरस्ट् शृङ्गस्य दक्षिणपूर्वभागे स्थिता द्वादश




कि मी दैर्घ्ययुता शिला एव गता एवम्। एतस्य भङ्गः पूर्वमेव संशयितः तथापि हिमाच्छादितावसंथायाम् स्थिरीकरण-साध्यता नासीत्। ब्रिटिष् पर्यवेक्षकः टीम् मोसेदाले एव हिलरीपादः विनष्टः, इति स्थिरीकृतवान्। एतस्य चित्रमपि सः मुखपुस्तके (फेस् बुक) विनिमीतमपि । गतवर्षे एव पादोयम् विनष्टमिति आवेदनानि आगतानि। स्थिरीकरणाय च बहुविधश्रमाः प्रचलिताः। समुद्रोपरितलात् नवत्युत्तरसप्तशताधिकअष्ट मीट ’मितौन्नत्ये एव अस्य स्थितिः। तीक्ष्णारोहणप्रदेशः अयम् एवरस्ट् अतिक्रान्तैः अन्तिमम् अतिक्रेतव्यः प्रदेशः। पश्चादवरोहणायापि एतत् स्थानम् नष्टमित्येतत् पर्वतारोहकान् अपघाते पातयेत्। उपरि प्राप्तुं च आरॉहकाः कष्टम् अनुभवन्ति। अतिशैत्ये प्रतीक्षा करणीया इति साहचर्यम् च वर्तते।

## लेखकानां कृते निवेदनम्

समोदं संसूचयामो यत् दिल्लीतः प्रकाश्यमाना संस्कृत-संवादनाम्नी पाक्षिकी पत्रिका भवतां समेषां संस्कृतानुरागिणां सृजनात्मकलेखान् गद्यत्वेन पद्यत्वेन वा आमन्त्रयति। तत्र भवल्लेखभाषा सुसंस्कृत परिष्कृत सरसा स्वकल्पिता औचित्यपूर्ण कल्याणवाहा आधुनिकभावभरिता समाजिकचैतन्यसम्भृता च स्यात्। आशास्महे भवन्तः निजपरितः जायमानानां नवीनानां घटनानां कार्यक्रमाणां च समाचारमत्र sanskritsamvad@gmail.com, सम्प्रेष्य संस्कृतसंस्कृत्योः प्रचाराय नैजं योगदानं प्रदास्यन्ति।

- संवादाय यान् लेखान् प्रेषयेयुः ते कागदस्य एकस्मिन् एव पार्श्वे लिखेयुः। पङ्क्तीनां मध्ये पर्याप्ततया अवकाशो भवेत्।
- लेखाः स्फुटैः अक्षरैः संयोजनं कारयित्वा प्रेषयन्ति तर्हि उत्तमस्।
- लेखस्य मूलं प्रति प्रेषयेयुः हस्तलिखितछायाप्रतिलेखाः न स्वीक्रिन्ते।
- लेखेषु, गीतेषु वा कुत्रापि राष्ट्रविरोधः व्यक्तिविरोधश्च न स्यात्।
- लेखस्य आदौ अन्ते वा लेखकस्य नाम अवश्यम् उल्लिखितं स्यात्।
- प्रसंगविशेषनिमित्तीकृत्य रचितः लेखः मासात् पूर्वम् एव प्रेषणीयः।
- कथाम् लेखञ्च येऽनुवादं कृत्वा प्रेषयितुम इच्छेयुः ते मूललेखकस्य अनुमतिपत्रं प्राप्य एव प्रेषयेयुः।
- ई-मेल् माध्यमेन अपि लेखादिकं प्रेषयितुं शक्यम्। तदा तु वाक्मैन-चाणक्यफोण्टद्वारा पेजमेकर इत्यस्मिन् देवनागरीलिप्यां मुद्रितैव सामग्री प्रकाशनाय सौकर्यं भवति।
- लेखाः पी.डी.एफ स्वरूपेऽपि स्वीक्रियते।
- संस्कृतजगद्वार्तासु केवलं संस्कृतभाषायामेव प्रेषणीयः।

# ई वी एम् दायित्वकाहलस्य अन्तिमदिनाङ्कः -प्रतिसन्धिम् न स्व्यकुर्वन् राष्ट्रियदलीयाः

नवदिल्ली। वैद्युतनिर्वाचनयन्त्रस्य ( ई वी एम् ) कार्यक्षमताप्रदर्शनाय कृतस्य श्रमस्य भागतया निर्वाचनसमित्या चाल्यमाने ई वी एम् दायित्वकाहले भागस्वीकाराय अपेक्षां दातुमद्य अन्तिमदिनाङ्कः । किन्तु एतावता केपि अपेक्षां न समर्पितवन्तः इति मुख्यनिर्वाचनसमित्याः समीपकेन्द्रैः ज्ञापितम् । निर्वाचनयन्त्रेषु व्यापकतया दुर्विनिमयः वर्तते इति आरोपणम् औद्योगिकरीत्या व्यक्तीकर्तुमेव एवं दायित्वस्वीकारः । सप्त अङ्गीकृतराष्ट्रियदलान् नवचत्वारिंशत् राज्यदलान् च एतदर्थम् निर्वाचनसमित्यधिकारिणः निमन्त्रितवन्तः । जून् तृतीये आरभ्य पञ्चदिनात्मकं यावत् चाल्यमाने ई वी एम् चालञ्च् कीर्यक्रमे भागं वोढुम् इच्छन्तः मई षड्विंशत्याम् सायम् पञ्चवादनात् पूर्वम् अपेक्षां दद्युरिति निर्देशः । आम् आदमी दलीयाः एव आरोपणम् उन्नीतवन्तः। परीक्षणेस्मिन् उपयुज्यमानसङ्गणकेषु , मातृफलकेषु परिवर्तनानि अपेक्षितानि इति आम् आदमी दलस्य अपेक्षां निर्वाचनसमितिः व्याक्षिपत् । परिवर्तने कथञ्चित् कृते तत्र प्रकृतिनिर्वाचनयन्त्रं च न भवेदिति च निर्वाचनसमित्या ज्ञापितम् । पूर्वं दिल्ली नियमसभायाम् आम् आदमी दलीयाः निर्वाचनयन्त्राणि चूषणं कृत्वा प्रादर्शयन् । किन्तु एतानि समित्याः नैवेति निर्वीचनसमित्या सूचितम् । कृत्रिमयन्त्राणि आसन्निति समित्याः वादः विमर्शनञ्च । जूण् मासे चाल्यमाने परीक्षणे प्रतिदलेभ्यः त्रयाणामेकः सङ्घः भागं वोढुमर्हति । विदेशीयविदग्धानां अनुमतिः निषिद्धा । पञ्चराज्येभ्यः आनीतेभ्यः निर्वाचनयन्त्रेभ्यः चत्वारि एकैकसङ्घः चेतुमर्हति । कृत्रिमं विना कार्यक्षमताप्रदर्शनाय चतुर्घण्टात्मकः समयोपि दत्तः वर्तते ।।

# संस्कृतं पठित्वा जनाः अत्याधुनिकाः भवितुम् अर्हन्ति- मुरलीमनोहर जोशी

कानपुरम् । अद्य कानपुरे त्रिदिवसीया प्राविधिक-संस्कृत-शैक्षिक-उपकरण-निर्माण-कार्यशाला आरब्धा । अस्यां देशस्य नाना-भागेभ्यः आगताः सप्तत्यधिकाः सहभागिनः प्रशिक्षणं प्राप्नुवन्ति । अवसरेह्यस्मिन् भाषमाणः सुख्यातः आचार्यः पूर्व-मानव-संसाधन-विकास-मन्त्री श्री मुरलीमनोहर-जोशी अवदत् यत् संस्कृतं पठित्वा जनाः अत्याधुनिकाः भवितुम् अर्हन्ति । सारस्वतातिथि- डॉ.बलदेवानन्द-सागरः सबलं अवादीत् यत् एतादृश्यः कार्यशालाः देशस्य विभिन्नभागेषु आयोज्य संस्कृतस्य उपयोगित्वं साधनीयम् ।




# नासया विक्षिप्यते भारत-विद्यार्थिनः लघुतमः उपग्रहः

नवदिल्ली। भारतीयानाम् अभिमाननिमेषः अयम्। भारतविद्यार्थी रिफात्त् षारूखेन निर्मितः लघूपग्रहः जूण्मासस्य एकविंशति (11) दिने नासया विक्षिप्यते। विश्वस्य प्रप्रथमः अयं लघूपग्रहस्य नाम



‘कलांसाट्’ इति भवति। तमिळ् नाट् राज्यस्य पल्लिप्पटि निवासी भवति रिफात्त् षारुखः। अष्टादशवर्ष-देशीयस्य अस्य प्रवेशः क्यूब्स् इन् स्पेस् इति स्पर्धाया एव आसीत्। स्पेस् किट्स् इन्ट्या नाम संस्थया एव अस्य अनुसन्धानस्य कृते धनव्ययः कृतः। बाह्याकाशस्य ‘ग्राविटि’ ‘माग्नट्टोफिर्यैः भ्रमणं, एतान् अधिकृत्य अनुसन्धानमेव विक्षेपणस्य लक्ष्यम्। वालोस् द्वीपस्थ नासायाः केन्द्रतः एव विक्षेपणं भविष्यति।



# ‘मनोगतम्’ - इति ‘मनकी बात’

## कार्यक्रमस्य प्रथमः संस्कृत-भाषिकानुवादः ]

## (प्रसारण-तिथिः 28.05.2017)



-संस्कृत-भाषान्तर-
द्वारा- डॉ.बलदेवानन्द सागर
Cell- 9810 5622 77
Email - baldevanand.sagar@gmail.com

मम प्रियाः देश-वासिनः ! नमस्कारः। अस्य वर्षस्य निदाघं न वयं विस्मरिष्यामः। परञ्च वृष्टिं प्रतीक्षामहे। अद्य अहं भवद्भिः सार्धं यदा संभाषे तदा रमजानस्य पवित्र-मासः आरभत। रमजानस्य पवित्र-मासारम्भे अहं भारतस्य अशेष-विश्वस्य च जनान् विशेषेण मुस्लिम-समुदायस्य कृते हार्दिकीः शुभ-कामनाः व्याहरामि। अवसरेह्यस्मिन्प्रार्थना-आध्यात्मिकता-दानेति -prayer-spirituality-charity- इति त्रयम् अतितरां महात्वाधायि आमान्यते। वयं भारतीयाः नितरां सौभाग्यशालिनः यतो हि अस्मदीयाः पूर्वजाः तादृशीः परम्पराः व्यरचयन् यत् भारतम् अद्य गौरवम् अनुभवति, वयं सपाद-शत-कोटि-देशवासिनः गौरवम् अनुभवामः यत् विश्वस्य सर्वेह्यपि सम्प्रदायाः भारते विराजन्ते। एतादृशोह्ययं देशः यत्र ईश्वर-विश्वासिनः, ईश्वर-विरोधिनोह्यपि, मूर्ति-पूजकाः, मूर्ति-पूजाविरोधिनोह्यपि निवसन्ति। प्रत्येक-प्रकारिकाः विचारधाराः, भिन्न-प्रकारिकाः पूजा-पद्धतीः, बहुविधाः परम्पराः च स्वीकृत्य वयं सर्वे सहैव स्थातुं जीवितुञ्च तादृशीं कलाम् आत्मसात्-कृतवन्तः। अपि च, अन्ततः कश्चन धर्मः, सम्प्रदायः, विचारधारा परम्परा वा भवतु, एते सर्वे अस्मान् शान्तिम् एकतां सद्भावनां च सन्दिशन्ति। रमजानस्य पवित्र-मासोह्ययं शान्तेः एकतायाः सद्भावनायाः च पन्थानमेनम् अग्रेसारयितुं नूनं सहायको भविता। पुनरेकवारं सर्वेभ्यः शुभ-कामनाः वितरामि।

विगते क्रमे, यदा अहं मनोगतं प्रकटयन् आसम् तदा मया एकः शब्दः प्रयुक्तः आसीत्, अपि च, विशेषेण युव-जनान् कथयन् आसम्, यत् किमपि नूतनं कुरुत इति। सौख्य-वलयात् बहिः निर्गच्छन्तु, अभिनवान् अनुभवान् च अर्जयत, इदमेव आयुः भवति यदा जीवने किञ्चित् सङ्कटं स्वीकृत्य काठिन्यानि चामन्त्रयितुं शक्यते। प्रसन्नताम् अनुभवामि यत् अनेके जनाः मां प्रतिक्रियां ज्ञापितवन्तः। मनोगत-भाव-प्रकटनार्थं व्यक्तिशः सर्वेह्यपि माम् उत्साहितवन्तः। न मया सर्वाः अपि प्रतिक्रियाः पठिताः न च, सर्वेह्यपि सन्देशाः श्रुताः, बृहन्-मात्रिकाः प्रतिक्रियाः अधिगताः सन्ति। परञ्च मया विहङ्गम-दृष्ट्या अपि यत् किमपि अवलोकितम्, तदस्ति - कश्चन संगीतम् अभ्यस्तुं प्रयतते, कश्चन नूतनानि वाद्यानि वादयितुं चेष्टते, केचन जनाः यूट्युब् -इत्यस्य उपयोगं कुर्वन्तः नूतन-विषयान् अवगन्तुं यतन्ते। अपरः नूतनां भाषां पठितुं प्रयतते। केचन पाक-विद्याम् अवगन्तुम् , अपरे च नृत्यं शिक्षितुं यतन्ते। एके नाट्यम् अभ्यस्तुं आरभन्त। केचन जनाः तु लिखितवन्तः यत् वयं साम्प्रतं कविताः लेखितुम् आरब्धवन्तः। प्रकृतिम् अवगन्तुम्, ज्ञातुं जीवितुं च एते, तस्यां दिशि प्रयतन्ते।

अहम् आनन्द-सन्दोहम् अन्वभवम्, अपि च, अन्यतमं दूरभाष-सम्भाषणं भवद्भ्यः अपि श्रावयितुं इच्छामि -

‘दीक्षा-कात्यालः वदामि। मम पठनस्य अनुसरणं प्रायेण अपगतम् आसीत्, अतः एतेषु अवकाश-दिनेषु मया पठनार्थं निश्चितम्। यदा मया स्वतन्त्रता-संग्राम-विषये पठनम् आरब्धम्, तदा मयानुभूतं यत् भारतस्य स्वातन्त्र्यार्थं कियान् संघर्षः विहितः ? कियत् बलिदानम् आचरितम्। कियन्तो हि स्वतन्त्रता-सैनिकाः कारासु अनेक-वर्षाणि यापितवन्तः ? भगतसिंहः यो हि अल्पे एव वयसि बहु अधिगतवान्, तेन अतितरां प्रेरिता अभवम्। अतः अत्र भवन्तम् अनुरुन्धे यत् विषयेह्यस्मिन् भवान् अद्यतनान् युवजनान् किञ्चित् संदिशतु।’

प्रसन्नोह्यस्मि यत् युव-जनाः अस्मदीयेतिहासस्य, अस्माकं स्वतन्त्रता-सैनिकानां राष्ट्र-हितार्थं बलिदान-कर्तृणाञ्च विषये ज्ञातुं रुचिमन्तो वर्तन्ते। असंख्याः महापुरुषाः यैः स्वीयं यौवनं कारासु एव यापितम्। अनेके नव-युवकाः रज्जुपाशेन मृत्युम् आलिङ्गितवन्तः। कियत् प्रकारकं काठिन्यं तैः न सोढम् ? तस्मादेव कारणात् साम्प्रतं वयं स्वतन्त्रे भारते श्वसिमः। एकं तथ्यन्तु अस्माभिः ज्ञातमेव यत् स्वतन्त्रतायाः आन्दोलने ये ये महापुरुषाः कारासु कालं यापितवन्तः, ते लेखनस्य अध्ययनस्य च महत्-कार्यम् अकुर्वन् अपि च, तेषां लेखनी अपिभारतस्य स्वाधीनतां सबलाम् अकरोत्।

बहु-वर्षेभ्यः प्राक् अहम् अण्डमान-निकोबारम् अगच्छम्, सेलुलर-कारां विलोकयितुं गतवान्। अद्य वीर-सावरकरस्य जन्म-जयन्ती वर्तते। वीर-सावरकरः कारायां ‘माजी जन्मठे’-पुस्तकम् अलिखत्। सः कविताः लिखति स्म, भित्तिषु लिखति स्म। अतिलघौ कुटीरे असौ पिहितः आसीत्। स्वाधीनतायाः कृते समर्पिताः एते अवर्णनीयां यातनां सोढवन्तः। यदा सावरकर-महोदयस्य ‘माझी जन्मठे’-पुस्तकम् अपठम्, तदाहं सेलुलर-कारां विलोकयितुं प्रेरितोह्यभवम्। तत्र एकः ध्वनि-प्रकाश-कार्यक्रमः प्रदर्श्यते, यो हि अतितरां प्रेरकोह्यस्ति। भारतस्य नैकमपि तादृशं राज्यमासीत्, भारतस्य नैकोह्यपि तादृशो भाषाभाषी आसीत् येन स्वाधीनतां प्राप्तुं ‘काला पानी’ इति दुर्गम-निर्वासन-दण्डम् अवाप्य अण्डमान-कारायाम्, अस्यां सेलुलर-कारायां स्वीयं यौवनं नैव यापितम्। प्रत्येकमपि भाषा-भाषी, प्रत्येकमपि प्रान्तस्य, प्रत्येकमपि प्रसूतेः च जनाः यातनाः सोढवन्तः।

अद्य वीर-सावरकरस्य जन्म-जयन्ती वर्तते। देशस्य युवजनान् अहं सबलं कथयामि यत् अस्माभिः या स्वाधीनता अधिगता, तदर्थं कियन्त्यः यातनाः जनाः सोढवन्तः ? कानि कानि कष्टानि चानुभूतवन्तः। यदि वयं सेलुलर-कारां गत्वा पश्येम चेत् ‘काला-पानी’ इति कथं कथ्यते, एतत्तु तत्र गत्वैव ज्ञातुं शक्यते। एतत्तु



अस्मदीय-स्वाधीनता-संग्रामस्य तीर्थ-क्षेत्रम्, प्राप्ते सति अवसरे भवन्तः नूनं तत्र गच्छन्तु।

मम प्रियाः देश-वासिनः ! जून-मासे पञ्चमेदिनाङ्के प्रथमोह्ययं सोमवासरः। एवं हि सर्वमपि सामान्यं वर्तते परञ्च जून-मासीयः पञ्चमः विशिष्टः दिवसोह्यस्ति, यतो हि अयं ‘पर्यावरण-दिवस’ त्वेन समायोज्यते, तथा च सम्वत्सरेह्यस्मिन् संयुक्त-संघेन विषयो निर्धारितोह्यस्ति यत् ‘Connecting People to Nature’ अर्थात् प्रकृत्या सह जनानां संयोजनम्। अपरैः शब्दैः वक्तुं शक्यते यत् back to basics तथा च, प्रकृत्या संयोजनं नाम किमस्ति? मम दृष्ट्या अस्यार्थोह्यस्ति- स्वात्मना सम्पर्को विधेयः। आत्मना एव आत्मनः संयोजनम्। प्रकृत्या सह सम्पर्कः अर्थात् भद्रतर-ग्रहस्य पुष्टीकरणम्। अपि च, विषयोह्ययं महात्म-गान्धिनम् अतिरिच्य अपरः कः सुष्ठुतया व्याख्यातुम् अर्हति ? महात्मा गान्धी बहुवारम् कथयन् आसीत्- ‘One must care about a worldone will not see’ अर्थात् यं विश्वं वयं नैव अवलोकयिष्यामः, अस्मदीयं कर्तव्यं वर्तते यत् तद्विषयेह्यपि अस्माभिः चिन्तनीयम्। अपि च, प्रकृतेः शक्तिः भवति, भवद्भिरपि अनुभूतं स्यात् यत् यदि भवान् बहु क्लान्तः सन् गृहमागतः तथाच, चषक-मात्रं जलेन मुख-प्रोक्षणं करोति चेत् तदा कियतीस्फूर्तिः अनुभूयते। बहु क्लान्तः सन् गृहमागतः चेत्, यदि कक्षस्य गवाक्ष-कपाटानि उद्घाटयेत्, द्वारं वा उद्घाटयेत्, सद्यः वायोः श्वसनञ्चविधीयेत चेत् एका नवीना चेतना अनुभूयते।

यैः पञ्च-भूतैः शरीरमिदं निर्मितमस्ति, तैः पञ्च-भूतैः साकं यदा संपर्को भवति तदा, स्वयमेव अस्मदीय-शरीरे काचित् नवीना चेतना प्रकटीभवति एका नूतना ऊर्जा उद्भवति। एतद् अस्माभिः सर्वैरपि अनुभूतम्, परञ्च सावधानं नैव अवलोकयामः। वयं तत् एकस्मिन् तन्तौ वा एकस्मिन् सूत्रे नैव ग्रथ्नामः। ततः परं भवन्तः नूनं अवलोकयन्तु यत् यदा यदा प्राकृतिक-स्थित्या सम्पर्को जायते, भवताम् अन्तर्मनसि एका नूतना चेतना उद्भविष्यति तथा च, एतदर्थं जून-मासस्य पञ्चम-दिनस्य प्रकृत्या सार्धं संयोजनस्य वैश्विकाभियानम्, अस्माकमपि वैयक्तिकम् अभियानं भवेत्। पर्यावरणस्य संरक्षणम् अस्मदीयैः पूर्वजैः अनुष्ठितम्, तस्य लाभाः अस्माभिः प्राप्यन्ते। यदि वयम् एनं रक्षिष्यामः तर्हि अस्मदीया भाविनी संततिः नूनं लाभान् अवाप्स्यति। वेदेषु पृथ्वी पर्यावरणञ्च शक्तेः आधारत्वेन वर्णिते स्तः। अस्माकं वेदेषु एतद्विषयकं वर्णनं लभ्यते। तथा च , अथर्ववेदस्तु पूर्णतया, पर्यावरणस्य बृहत्तमः दिशा-निर्देशकः ग्रन्थोह्यस्ति। नैक-सहस्र-वर्षेभ्यः पूर्वं विरचितः। वेदेषु प्रोक्तम् - ‘माता भूमिः पुत्रोह्यहं पृथिव्याः। ‘वेदेषु वर्णितं यत् अस्मत्सु यत् पावित्र्यमस्ति, तद्धि अस्मदीयायाः पृथिव्याः कारणादेव। पृथ्वी अस्माकं माता अस्ति, वयञ्च तस्याः पुत्राः।

यदि वयं भगवन्तं बुद्धं स्मरामः तदा तथ्यमिदं नूनं स्फुटीभवति यत् महात्मनः बुद्धस्य जन्म, तस्य बुद्धत्व-प्राप्तिः, तस्य च महा-परिनिर्वाणः- एतत्-त्रयमपि वृक्षस्य अधस्तात् अजायत। अस्माकं देशेह्यपि अनेके एतादृशाः उत्सवाः, विविधाः एतादृश्यः अर्चना-पद्धतयः च सन्ति। पठिताः साक्षराः निरक्षराः वा भवन्तु, पौराः ग्रामीणाः वा आदिवासि-सामाजिकाः च भवन्तु, प्रकृतेः अर्चना, प्रकृतिं प्रति प्रेम वा सहजरूपेण समाज-जीवनस्य अङ्गत्वेन विद्यते। परञ्च अस्माभिरिदं आधुनिक-शब्देषु आधुनिक-तर्कैः साकं संयोजनीयम्, एतदस्ति परमावश्यकम्।

एतेषु दिनेषु अहं राज्येभ्यः वार्ताः प्राप्नुवन् अस्मि। प्रायेण सर्वेष्वपि राज्येषु वृष्टेः आगमनेन सहैव वृक्षारोपणस्य बृहदभियानं प्रचलति। अनेक-कोटि-वृक्षाणां वपनं भवति। विद्यालयीयाः बालाः अपि अत्र संयोज्यन्ते, समाजसेवि-संघटनानि अपि संयुतानि भवन्ति, प्रशासनेतर-संघटनानि अपि संयुक्तानि भवन्ति, प्रशासनमपि स्वयं प्रथम-प्रयासत्वेन आचरति। वयमपि अस्मिन् काले वर्षा-र्त्तौ वृक्षारोपणं प्रोत्साहयेम, एतदर्थं योगदानं कुर्म।

मम प्रियाः देशवासिनः ! जूनमासीयः एकविंशतितमः दिवसः, सम्प्रति अशेष-जगति जूनमासीयः एकविंशतितमः दिवसः, परिचित-दिनत्वेन अभिज्ञायते। विश्व-योग-दिवस-रूपेण संपूर्णमपि जगत् एनम् आयोजयति। अल्पीयसि एव काले जूनमासीयः एकविंशतितम-योग-दिवसः, प्रत्येकमपि कोणे प्रसृतो जातः, अयञ्च जनान् संयोजयति।

एकतः जगति पृथक्तायाः अनेकाः शक्तयः स्वीयं विकृतं मुखं विस्फारयति, एतादृशे काले योगाचरणं नाम विश्वस्य कृते भारतस्य बृहत्तमं योगदानं वर्तते। योग-माध्यमेन वयं विश्वम् एकसूत्रे संयोजयितुं शक्नुमः। यथा योगः- शरीरं मनः बुद्धिम् आत्मानं च संयोजयति, तथैव अद्यत्वे योगाभ्यासः विश्वमपि संयोजयति।

अद्यत्वे जीवन-शैली-कारणात्, व्यग्रतातः, त्वरायाः च कारणात्, समेधमान-दायित्व-भाव-हेतोः च आतति-मुक्त-जीवनं कठिनायते। अपि च, एतदपि ज्ञायते यत् लघु-वयोयुतेषु अपि एषा स्थितिः दृग्गोचरीभवति। प्रकीर्णाः अप्रामाणिकाः चौषधयः स्वीक्रियन्ते, एवं हि कालो याप्यते। एतादृश्यां स्थितौ आतति-मुक्त-जीवनार्थं योगस्य भूमिका महत्वपूर्णा अस्ति। योगो नाम आरोग्यतायाः समीचीनतायाः च प्रतिभूतित्वेन विराजते। योगो नाम न केवलं व्यायाम-क्रिया। शरीरेण मनसा विचारैः आचारेण च स्वस्थतायाः अन्तर्यात्रा केन प्रकारेण प्रचलेत् - तस्याः अन्तर्यात्रायाः अनुभवः केवलं योगाचरण-माध्यमेन एव संभाव्यते। सद्यः दिवस-द्वय-पूर्वमेव, अहं योग-दिवस-विषये विश्वस्य सर्वेभ्यः प्रशासनेभ्यः नेतृभ्यः च, पत्राणि लिखितवान्।

विगते वर्षे अहं योग-सम्बद्धाः काश्चन स्पर्धाः घोषितवान्। केचन पुरस्काराः घोषिताः। शनैः शनैः तस्यां दिशि कार्यम् अग्रेसरिष्यति। मया परामर्शः अधिगतः, अपि च एनं मौलिक-पराम- र्शकम् अभिनन्दामि। अतीव रोचकोह्ययं परामर्शः। तेनोक्तं यत् तृतीयोह्ययम् अन्ताराष्ट्रिय-योग-दिवसः अस्ति, मामसौ परामर्शितवान् यत् तृतीय-अन्ताराष्ट्रिय-योग-दिवसावसरे एकस्यैव कुटुम्बस्य सन्तति-त्रयं युगपदेव योगाभ्यासम् आचरेत्। पितामहः पितामही च भवतु वा मातामहः मातामही वा, माता-पितरौ, पुत्रः पुत्री वा, सन्तति-त्रयमपि युगपदमेव योगाभ्यासं करोतु, तथा च, एतस्य चित्राणि अन्तर्जाले स्थापयन्तु, ह्यः. अद्य श्वः चेति सुभग-संयोगो भविता , योगाभ्यासाय

शेषभागः पंचमपुटे

# सम्पादकीयम्

## बालानां ग्रीष्मावकाशः गृहकार्यं च

यदा मई मासमागच्छति तदा सर्वेषां मनसि-स्वाभाविकमुत्साहं भवति। बालाः विद्यार्थिनः वा पूर्वमेव स्वमित्रैः सह योजनानां निर्माणं कुर्वन्ति यत् ते भ्रमणायात्रतत्र गमिष्यन्ति। ते तयावकाशानां परिकल्पनां कृत्वाऽपि रोमाचिंताः भवन्ति। ते बहुप्रसन्नाः भवन्ति। परन्तु अवकाशात् द्वि-त्रीणि दिन पूर्वं यदा शिक्षकाः ग्रीष्ममावकाश कार्यं यच्छन्ति तदा ते दुःखिनः भवन्ति। अवकाश कार्यं सर्वे शिक्षकाः एतत् विचिन्त्यैव यच्छन्ति यत् एते बालकाः केवलं ममैव विषयाः पठन्ति। एकैकस्य अध्यापकस्य गृह कार्यं दसदिवसे-अपि पूर्णतां न याति। प्रायशः षड्मुख्यविषयाः भवन्ति। अतः तेषां सर्वेषां गृहकार्य करणाय 10x6=60 दिवसाः अपेक्ष्यते परन्तु-अवकाशाः तु इदानीम 30 दिनेभ्यः एव भवति। तदा छात्राः वदन्ति वयं ग्रीष्मावकाशं न यच्छामः एतस्मात् तु विद्यालयोद्घाटनमेववरम्। विद्यालय प्रबन्ध नभिवावकभ्यां च चिन्तनियोऽयं विषयः। पुरा ग्रीष्मावकाशे बालाः स्व मातुल: अन्य प्रिय जन गृहं वा यान्ति स्म। येन पारस्परिक सम्बन्धसु दृढ़ता भवति स्म। बालानां माता-पिता सर्वे गृहजनाः वाः ग्रीष्मावकाशागमने सति प्रसन्नाः भवन्ति स्म। परन्तु इदानीम बालाः अहोरात्रं ग्रीष्मावकाश गृहेकार्ये एव समयः यापयन्ति। एवं तेषां मानसिक-सामाजिक शारीरिक विकासे ग्रीष्मवकाशगृहकार्यं बाधां जनयति अतः एतादृशी व्यवस्थायां परिवर्तनमावश्कमस्ति। नात्र ग्रीष्मावकाश गृहकार्यस्य विरोधः परन्तु तस्य सीमा भवेत् 30 अवकाश दिनेषु 20 दिवसाः बालकस्य सर्वाङ्गीण विकासाय भवेत्।

## वेदामृतम्

**द्वितीयोऽनुवादकः**

**( ४ ) अथास्य दशर्चस्य चतुर्थसुक्तस्य मधुच्छन्दा ऋषिः। इन्द्रो देवता। १,२,४-९, गायत्री; ३ विराड्गायत्री; १० निचृद्गायत्री च छन्दः। षड्जः स्वरः॥**

**अब चौथे सूक्त का आरम्भर करते हैं। ईश्वर ने इस सूक्त के पहले मन्त्र में उक्त विद्या के पूर्ण करने वाले साधन का प्रकाश किया है।**

**सुरूपकृत्नुमूतये सुदुघामिव गोदुहे।**
**जुहूमसि द्यविद्यवि॥१॥**

अर्थ- इस मन्त्र में उपमालङ्कार है। जैसे मुनष्य गाय के दूध को प्राप्त होके अपने प्रयोजन को सिद्ध करते हैं, वैसे ही विद्वान धार्मिक पुरुष भी परमेश्वर की उपासना से श्रेष्ठ विद्या आदि गुणों को प्राप्त होकर अपने-अपने कार्यों को पूर्ण करते हैं।।1।।

अगले मन्त्र में ईश्वर ने इन्द्र शब्द से सूर्य के गुणों का वर्णन किया है-

**उप नः सवना गहि सोमस्य सोमपाः पिब।**
**गोदा इद्रेवतो मदः॥२॥**

अर्थ-जिस प्रकार सब जीव सूर्य के प्रकाश में अपने-अपने कर्म करने को प्रवृत्त होते हैं, उस प्रकार रात्रि में सुख से नहीं हो सकते।।2।।

जिसने सूर्य को बनाया है, उस परमेश्वर ने अपने जीवन का उपाय अगले मन्त्र में जनाया है-

**अथा ते अन्तमानां विद्याम सुमतीनम्।**
**मा नो अति ख्य आ गहि॥३॥**

अर्थ-जब मनुष्य इस धार्मिक श्रेष्ठ विद्वानों के समागम से शिक्षा और विद्या को प्राप्त होते हैं, तभी पृथिवी से लेकर परमेश्वर पर्य्यन्त पदार्थों के ज्ञान द्वारा नाना प्रकार से सुखी होकर फिर वे अन्यर्यामी ईश्वर के उपदेश को छोड़कर कभी इधर-उधर नहीं भ्रमते।।3।।

# उज्जयिनीयं जयति



डॉ.रमाकान्त शुक्लः

क्षणमपि दृष्ट्वा यालोकयितुर्जातु जहाति न चित्तम्।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्।।
उज्जयिनीयं जयति विशाला कविगणवन्द्या नित्यम्।।

उद्घाटयति निजं हृदयं ब्रूते निजकथा अतीताः
श्यामामृत्तिका स्पृष्ट्वा प्रेम्णा यस्या लोकातीता।
कालिदास-शूद्रक-विक्रम-वेताल-विलक्षणघटनाः।।
कविकुलवर्णितविविधदेशवस्तूच्चयरीतिविरचनाः।।
प्रत्यक्षं तनुते मानसमोदाय समेषां सततम्
उज्जयिनीयं जयति विशाला बुधजनबन्द्या नित्यम्।।(1)

उदयन-वासवदत्ता-सेना-चारुदत्त-कल-गाथाः
केकित्रासककबरीभाराः सुरभिलधूपसनाथाः।
लोलापाङ्गैर्लसितास्तन्व्यः श्यामा मध्ये क्षामाः
श्रोणीभाराद्विलसितगमनाः तन्त्रीवादनकामाः।।
पदे पदे साक्षात्क्रियन्ते यत्र सहृदयैर्नित्यम्।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्।।(2)

हारास्तारास्तरला गुटिका भाण्डसमूहा भव्याः
पुष्पस्तबकाः शेखरहारा माला नव्याः नव्याः।
शिप्रावाताः कविसङ्घाता महाकालशिवभक्ताः
शास्त्रकाव्यनाटकसङ्गीतानां गोष्ठीष्वनुरक्ताः।।
यत्राद्याप्यविरतं हरन्ति प्रेक्षावतां सुचित्तम्।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्।। (3)

अत्रैवाभिरूपभूयिष्ठा विक्रमपरिषत् शुशुभे
या कविताकालिदासकृतनाटकवीक्षणाय खलु लुलुभे।
अत्रैवापरितोषाद्विदुषां कविना यत्नोऽकारि
बाणो विजहारात्र निश्चितं सहृदयहृदयविहारी।।
अत्रागत्य जायते चित्तं शिवं सुन्दरं सत्यम्।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्।।(4)

शिप्रास्नानं यत्र धर्मिणः कलिमलदारणनिपुणम्
अर्थकामिनो विपणिविभागं नानापण्यसुपूर्णम्।
कामकामिनोऽभिमतं स्थानं नवलविलासोल्लसितम्
मोक्षार्थिनो महाकालेशं ज्योतिर्लिङ्गं प्रथितम्।
क्षीरसागरं यान्ति च रसिका नद्यो यथा समुद्रम्।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्।।(5)

'चल चल भामिनि चल सिंहस्थं द्वादशवर्षैर्लब्धम्'
'चल गजगामिनि कार्तिकमेलाक्षेत्रं कौतुकलुब्धम्।'
चल मूढे क्रीणामि सुमाल्यं मालीपुरे त्वदर्थम्'
'अहो श्रूयते कार्तिकमासे शृणु शृणु कोकिलविरुतम्'।।
यत्रेत्थं चाटूयति रमणो दयितानिर्दयचित्तम्।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्।। (6)

प्रतिवर्षं खलु यस्याः शिप्रातीरे विचलितधीरे
'माच'-दर्शनोत्सुकैर्मालवैः मेलाशीतसमीरे।
अविदितगतयामा रजनी नीयतेतरां निश्चिन्तम्
झञ्झावाते घनघनवर्षे वापि शीतले नीरे।।
अहो मधुरिमा, अहो प्रमोदो यस्या अतुलो नित्यम्।
उज्जयिनीयं जयति वशाला बुधजनवन्द्या नित्यम्।। (7)

रविकरचुम्बितकमलविकासैः मदकलसारसनादैः
मालविकानां सुमधुरहासैः विबुधशिरोमणिवादैः।
देवोत्थानवह्निखेलाभिर्नवनवदीपविलासैः
भैरवगढमुद्रितवस्त्राणां चेतोहरैः सुहासैः।।
बालवृद्धयूनां परिहासैर्या जयति जगच्चित्तम्।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्।। (8)

चमरपुच्छिका खण्डितकन्दुक कुसुमनोहरवर्षैः
कविकविताप्रस्तुतिवेलायां सहृदयसुहृदां हर्षैः।
अतिथीनां विदुषां सचेतसां सुमनोरथचङ्क्रमणैः
व्याससमासरीतिवक्तव्यैः भावानां सङ्क्रमणैः।
कीर्तिमन्दिरं भाति हि यस्याः कालिदासमहममहितम्
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्।। (9)

पक्षप्रहारैश्चञ्चुश्लेषैः गुटरगुटरगूँकारैः
मानैरनुधावनैरथो मदनाज्ञापालनचारैः।
द्वाभ्यां तथा तृतीयस्योत्सारणैर्यत्र सव्यूहः
अश्मभ्योऽपि हि प्रेमकलामुपदिशति कपोतसमूहः।।
विक्रमकीर्तिमन्दिरं तद्यस्या अक्षय्यं वित्तम्।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्।। (10)

हरसिद्धिं योगेश्वरसदनं मङ्गलनाथं रम्यं
भर्तृहरेर्गह्वरं, चाश्रमं सान्दीपनेः पवित्रम्।
ज्येष्ठगणेशं, पञ्चमुखं हनुमन्तं भवभयहरणम्
दर्शनीयमथ नानातत्त्वं यस्यां विस्मयकरणम्।।
वीक्ष्य भवति नहि कस्य मनो वद श्रद्धा-विस्मयभरितम्।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्।। (11)

यत्रागत्य निवर्तितुमिच्छति नैवागन्तुकलोकः
श्रावं श्रावं यस्या गाथां तृप्तिं याति न लोकः।
स्मारं स्मारं यस्या विभवं भवति विस्मितो लोकः
पायं पायं यस्या शोभां माद्यति सर्वो लोकः।
यस्या विरहो जनयति मोहं, व्यथयति दृढमपि चित्तम्।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्।। (12)

विहरति विहसति विलसति नृत्यति या मानसे न केषाम्?
सुखयति मदयति रमयति रसयति या मानसं न केषाम्?
सरला सरसा मुग्धोदारा या राजते समेषाम्।
शुभदा सुखदा वरदादरदा या राजते समेषाम्।
सर्वशुक्लया वाग्देव्या खलु यत्र समोदं हसितम्।।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्।। (13)

साभार: सर्वाशुक्लोत्तरा

# स्त्रीङ्कपुरुषयोः शरीरस्थ तिलादि चिह्नफलम्

ज्योतिषशास्त्रे देहजातचिह्नानां विशेषतः मशकः, आवर्त्त, तिलादि चिह्नानां महत्वं वर्तते, एतानि चिह्नानि दृष्ट्वा अपि जातकस्य शुभाशुभ-फलकथनं भवति। स्त्रीणां वामभागे तथा च पुरुषाणां दक्षिणभागस्य तिलसदृशं चिह्नाः शुभानि भवन्ति। स्त्रीणां हृदयोऽपरि तिलादिक चिह्नं सुख-सौभाग्यवर्धकः भवति। स्त्रीणां दक्षिणस्तनोपरि रक्ततिलचिह्नं शुभं सन्ततिप्रदः च भवति। वामस्तनोपरि रक्ततिलचिह्नं एकपुत्रप्रद भवति। दक्षिणस्तनस्य तिलचिह्नं पुत्रपुत्र्योत्पादकः भवति। भालेऽथवा भ्रुवोमध्ये रक्ततिलचिह्नं राज्यप्रद भवति।

यस्याः स्त्रियाः भगस्य दक्षिणभागे तिलादि चिह्नं भवति सा नृपस्य धर्मपत्नी राजमाता वा भवति। नासाग्रे रक्तचिह्नं राजमहिषी इत्यस्य लक्षणं भवति। तथा च नासाग्रे यदि श्यामवर्णीयचिह्नम् अस्ति तदा स्त्री विधवा-पुंश्चली भवति। नाभेरंध्रः विद्यमान चिह्नं स्त्री-पुरुषाणां कृते शुभप्रदो भवति। यस्याः कर्णे कपोले, हस्ते, कण्ठे च चिह्नं भवति तर्हि प्रथमसन्तान सौभाग्य-सुखप्रदो भवति। गुल्मप्रदेशे तिलादिक-चिह्नम् अशुभं भवति। स्त्रीणां मस्तकोपरि त्रिशूलाकार-चिह्नं राजमहिषी इत्यस्य लक्षणं भवति तथा च पुरुषाणाम् उपरि भवति चे नृपो भवति। हृदय-नाभि-हस्थ-कर्ण-दक्षिणपृष्ठे च स्थितं दक्षिणावर्त्त-रोमचक्रः शुभप्रदो भवति तथा च नाभिलिङ्गयोः मध्ये वामावर्त्त रोमचक्रः अशुभप्रदो भवति।

स्त्रीणां कटिप्रदेशे तथा च गुप्तस्थाने स्थितम् आवर्त्त दुःखप्रदं भवति। उदरे आवर्त्तः सति तदा भ्रातुः विनाशो जायते। यस्याः पृष्ठस्य मध्ये आवर्त्तः सति तदा सा पुंश्चली भवति। सीमन्तप्रदेशे, कपाले, कण्ठस्य च आवर्त्तः स्त्री-पुरुषाणां कृते अशुभप्रदो भवति।

आशीषकुमारशर्मा
शोधच्छात्रः
जगद्गुरुरामानन्दाचार्यराजस्थान
-संस्कृतविश्वविद्यालयः, जयपुरम्

तृतीयपुटस्य शेषभाग:

## ‘मनोगतम्’ - इति ‘मनकी बात’...

च नूतन: आयामोऽपि अवाप्स्यते।

एतत्-परामर्शार्थं साधुवादान् वितरामि। अहमपि अनुभवामि यत् यथा पूर्वं ‘selfie with daughter’ इति अभियानम् अस्माभि: प्रचालितमासीत्, तदा रोचक: अनुभव: सञ्जात: आसीत्। योगाभ्यास-निरतस्य सन्तति-त्रयस्य एतानि चित्राणि नूनं देशस्य जगत: च कृते कौतुहल-कराणि भविष्यन्ति। भवन्त: अवश्यमेव NarendraModiApp,MyGov चेत्यत्र सन्तति-त्रयस्य, जना: यत्र युगपत् योगाभ्यासं कुर्वन्त: सन्ति, तेषां चित्राणि मह्यं प्रेषयन्तु। ह्य:. अद्य श्व: चेति सुभग-संयोगस्य एतानि चित्राणि भवितार:। यानि भद्रतरस्य भाविकालस्य प्रत्याभूतिरूपेण सेत्स्यन्ति। अहं अत्र भवत: सर्वान् आमन्त्रयामि। इत: परम् अन्ताराष्ट्रिय-योग-दिवसस्य कृते प्राय: सप्ताह-त्रयस्य काल: अस्माकं पार्श्वे वर्तते। अद्य प्रभृति एव, अभ्यासम् आरभन्ताम् ! अहं जून-मासस्य प्रथम-दिवसादेव प्रतिदिनं twitter- इत्यत्र योग-सम्बद्धं किञ्चित् किञ्चित् प्रेषयिष्यामि, तथा च, अनारतं एक-विन्शतितमं दिनं यावत् प्रेषयिष्यामि, एतत् भवद्भि: साकं संभजिष्ये। भवन्तोऽपि सप्ताह-त्रयम् अनारतं योग-विषयं प्रचारयन्तु,प्रसारयन्तु च, जनान् च संयोजयन्तु। एवं हि एतत् निवारक-स्वास्थ्य-परिचर्याया: आन्दोलनमेव अस्ति। अत्र आत्मानं संयोजयितुम् अहं भवत: सर्वान् आमन्त्रयामि।

यावत् प्रभृति भवन्त: मह्यं प्रधान-सेवकस्य दायित्वं दत्तवन्त:, तथा च, प्रथम-वारं रक्तदुर्गस्य प्राचीरेभ्य:, अगस्त-मासे पञ्चदश-दिनाङ्के अभिभाषणस्यअवसरं प्राप्तवान्, तदा स्वच्छता-विषये मया अभिभाषितमासीत्। तदा प्रभृति आरभ्य अद्य पर्यन्तं भारतस्य नाना-भागेषु मम प्रवासो भवति। मया अवलोकितं यत् केचन जना: अतिसूक्ष्मतया निरीक्षन्ते यत् मोदि-वर्य: किं करोति ? मोदि-वर्य: कुत्र गच्छति ? मोदिवर्येण किं किं कृतम् ? निरन्तरम् एतत् अनुसरन्ति। यतो हि अहम् एकम् अतिरोचकं दूरभाष-सन्देशं प्राप्तवान्, मयापि कदाचिद् एवं नैव विचारितमासीत् । परञ्च तया यो विषय: अवधारित: तदर्थं तस्या: कार्तज्ञ्यम् आवहामि। एतत्तु भवन्त: अमुना दूरभाषेण अवधास्यन्ति।

‘प्रणमामि मोदि-वार्याय। मुम्बईत: अहमस्मि नैना। मोदि-वर्य ! दृश्य-माध्यमेषु सामाजिक-सञ्चार-माध्यमेषु च अद्यत्वे सततं पश्यामि यत् भवान् यत्र-कुत्रापि याति, तत्रत्या: जना: स्वच्छता-विषये विशेषेण अवधानं प्रददति। मुम्बई भवतु वा सूरत इति - भवत: आह्वानं स्वीकृत्य जना: सामूहिक-रूपेण स्वच्छता-विषयं विशिष्ट-कर्मत्वेन अङ्गीकृतवन्त:। न केवलं वरिष्ठा: जना:, बाला: अपि स्वच्छता-विषये प्रबुद्धा: सञ्जाता: सन्ति। मार्गोपरि अवस्कर-प्रसारकान् वरिष्ठान् निवारयन्त: एते अनेकवारम् अवलोकिता:। काश्या: घट्टेभ्य: यत् स्वच्छताभियानं भवता आरब्धम्, भवत: प्रेरणया तत् साम्प्रतं आन्दोलनात्मकेन रूपायितम्।’

भवत: विचार: समुचित: यत् यत्र-यत्र अहं गच्छामि, तत्र प्रशासन-तन्त्रं तु स्वच्छता-कार्याणि कुर्वन्ति, किन्तु एतेषु दिनेषु समाजेऽपि स्वच्छता-समुत्सव: संजायते। मम तत्र गमनात् पञ्च-दिनेभ्य: प्राक्, सप्त-दिनेभ्य: दश-दिनेभ्यो वा प्राक्, बहुमात्रिका: स्वच्छता-कार्यक्रमा: भवन्ति। सञ्चार-माध्यमानि अपि, वार्तामेनां समधिकावधानेन प्रचारयन्ति।’

नातिचिरं गुजराते कच्छ-प्रदेशं गतवान् आसम्। तत्र बृहन्मात्रिकं स्वच्छताभियानं प्रावर्तत। मयापि इदं संयोज्य नैव विचारितमासीत् परञ्च यदा अयं दूरभाष: आगत: तदा अहमपि विचारयितुम् आरभम्। मया दृष्टं यत् एतत्तु समीचीनमेवास्ति। भवन्त: कल्पयितुं शक्नुवन्ति यत् कियन्तं महान्तम् आनन्दम् अनुभवामि - एतत् ज्ञात्वा यत् अशेष-राष्ट्रमपि एतानि तथ्यानि विशेषोल्लेख-पुरस्सरं निभालयन्ति। मम कृते नेत: परं अधिकतरा प्रसन्नता अस्ति यत् मम यात्रापि स्वच्छतया साकं संयोजिता जाता । प्रधानमन्त्रिण: स्वागतार्थम् अन्यत् सर्वम् औपचारिकोपकल्पनं भवति, तद् भवतु नाम, परञ्च, स्वच्छता नाम प्रमुख-विषयत्वेन एव स्यात् । एतत्तु कस्यापि स्वच्छता-प्रेमिण: कृते सर्वाधिकम् आनन्द-दायकं, प्रेरकञ्च भवति। स्वच्छता-कार्यं सबलं विधातुं प्रयतमानेभ्य: सर्वेभ्य: साधुवादान् व्याहरामि।

कश्चन मां परामर्शयत् । यद्यपि परामर्शोऽयं विनोदात्मक: अस्ति, नाहं जाने यत् इदं कर्तुं पारयिष्यामि न वा इति।

‘मोदि-महोदय ! इत: परं प्रवासार्थं निश्चयावसरे य: भवत्-प्रवासार्थं निवेदयति, स: निर्देष्टव्य: यत् स्वच्छता-स्तर: कीदृश: अस्ति वा कियत्-टन-परिमितम् अवकरम् भवन्त: मह्यम् उपाहरिष्यन्ति ? तदाधारीकृत्य अहं प्रवासं निश्चेष्यामि। विचार: अत्युत्तम: परञ्च एतदर्थं मया विचारणीयम् अवशिष्यते। किन्तु एतत्तु समुचितमेव यत् इदमान्दोलनत्वेन प्रवर्तेत। इतर-वस्तूनाम् उपायनीकरणापेक्षया इदं शुभं भविता यत् वयम् उपहार-रूपेण स्वच्छता-कार्याणि कृत्वा एतावन्-टन-मात्रिकम् अवकरं दद्मेम। एवं हि वयं अनेकान् जनान् रोगेभ्य: रक्षितुं शक्ष्याम:। कियत् हि श्रेष्ठं मानवता-कार्यं भविता। अपरमेकं वस्तु नूनं कथयिष्यामि यत् यत् अवकर-जातं वर्तते, तद्धि ‘वेस्ट’-निरर्थकं नास्ति , तदस्ति ‘वेल्थ’- समृद्धि: वा resource अर्थात् संसाधनम्। नैतत् केवलं निरुपयोगीति परिभावनीयम्। यदि वयम् अवकरं संसाधनत्वेन मन्तुं आरप्स्यामहे चेत् अवकर-प्रबन्धनस्य अनेके अभिनवा: पद्धतय: अस्माकं समक्षम् आगमिष्यन्ति। start up - इत्यनेन संयुक्ता: नवयुवका: अपि नव-नव-योजना: आदाय आगमिष्यन्ति। नूतनानि उपकरणानि नीत्वा आयास्यन्ति। भारतीय-प्रशासनं राज्य-प्रशासनानां साहाय्येन साकमेव नगराणां जन-प्रतिनिधीनां साहाय्य-द्वारा अवस्कर-प्रबन्धनस्य महत्वाधायि अभियानमेकं प्रवर्तयितुं निरणैषीत्। जून-मासीये पञ्चम-दिनाङ्के देशस्य प्रायेण चतु:सहस्र-नगरेषु solid waste - liquid waste - इति घट्ट-प्रवाहि-प्रकारयो: अवस्करयो: संग्रहणार्थं तावत्-प्रकारकाणि साधनानि उपलप्स्यन्ते। द्वि-प्रकारिका: अवकर-पेटिका: उपलप्स्यन्ते - अनयो: एका हरित-वर्णिका अपरा च नील-वर्णिका। द्वि-प्रकारक: अवकरो भवति। अनयो: अन्यतर: प्रवाहि-अवकर:, अपरश्च शुष्क: अवकर:। यदि वयम् अनुशासनम् अनुसरामश्चेत् एतेषु चतु:-सहस्रं नगरेषु एता: अवकर-पेटिका: स्थापयिष्यन्ते। शुष्क: अवकर: नील-वर्णिकायां पेटिकायां प्रक्षिपन्तु, तथा च, आर्द्रावकरं हरित-पेटिकायां क्षिपन्तु। यथा पाकशालाया: अवकारादय: - शाकादीनां पत्राणि, अवशिष्टं भोजनम्, कुक्कुटाण्ड-आवरणानि, पादप-पत्राणि च भवन्ति, एतानि सर्वाणि आर्द्र-अवकारत्वेन सन्ति, तानि च हरित-पेटिकायां क्षेपणीयानि। एतानि वस्तूनि कृषि-क्षेत्रेषु समुपयुक्तानि भवन्ति। क्षेत्रस्य वर्ण: हरित: इति मनसि स्मरणं धार्यते चेत् हरित-पेटिकायां किं किं क्षेपणीयमिति नूनं स्मृतौ सुस्थिरं भविता। अपि च, अपर: अवस्कर: अस्ति - व्यर्थ-कर्गज:, स्थूल-कर्गज:,लौह:, शीशकं वस्त्र-खण्डानि, घट्यातु:, विशीर्णा: लघु-पेटिका:, धातव:, plastic-polythene-चेत्यादीनि अनेकानि वस्तूनि भवन्ति - एतानि सर्वाणि शुष्क-प्रकारकाणि अवकर-जातानि सन्ति, एतानि यन्त्रेषु स्थापयित्वा recycle-पद्धत्यत्वा पुनरुपयोगार्थं संस्क्रियन्ते। अनुपयुक्तानि वस्तूनि नील-वर्णिकायां पेटिकायां क्षेपणीयानि सन्ति।

अहं विश्वसिमि यत् वयं सम्भूय एकां संस्कृतिं विकासयिष्याम: स्वच्छतां प्रति पौन:पुनिकम् अस्माभि: नूतना: पद-क्षेपा: सततं करणीया: सन्ति। तदैव वयं गान्धि-महात्मना दृष्टान् स्वप्नान्, स्वच्छता-विषयकान् स्वप्नान् प्रपूरयितुं शक्ष्याम:।

अद्याहं सगर्वं इदम् उल्लेखितुं प्रभवामि यत् एकाकी जन: यदि मनसि निश्चिनोति चेत् स: बृहत्-जनान्दोलनम् प्रवर्तयितुं शक्नोति। स्वच्छताया: कार्यमपि तादृशमेवास्ति।

विगतेषु दिनेषु , भवद्भि: एका वार्ता श्रुता स्यात्। मुम्बय्यां अस्वच्छता-युत: वर्सोवा-तट-विस्तर: सम्प्रति स्वच्छ: सुन्दरश्च तट-प्रदेश: सञ्जात:। नैतत् सहसा सञ्जातम् । प्राय: अशीति-नवति-सप्ताह-पर्यन्तं नागरिका: निरन्तरं परिश्रमं कृत्वा वर्सोवा-तट-विस्तरस्य स्वरूपं परिवर्तितवन्त:। सहस्राधिक-टन-परिमित: अवकरो निष्कासित:, तत: परमेव वर्सोवा-तट-विस्तर: अद्यत्वे स्वच्छ: सुन्दरश्च अजायत। अस्य कार्यस्य पूर्ण-दायित्वं निर्व्यूढम् - VRV - इति वर्सोवा-आवास-स्वयंसेविना श्रीमता अफरोज-शाहेन। वर्ष-द्वय-पूर्वं अक्टूबर-मासे असौ सर्वात्मना कार्येऽस्मिन् व्यापृत: जात:। शनै: शनै: समूहोऽयं अग्रेसृत:। जनान्दोलनत्वेन परिणत:। अपि चैतत्-कार्यार्थं श्रीमान् अफरोज-शाह: संयुक्त-राष्ट्र-संघस्य पर्यावरण-कार्यक्रमेण सबहु-मान-पुरस्सरं सम्मानित: पुरस्कृतश्च Champions of the Earth Award - इति पुरस्कार-प्रापकेषु असौ प्रथम: भारतीय: सिद्ध:। अहं श्रीमन्तम् अफरोज-शाहम् अभिनन्दामि। आन्दोलनमिदं वर्धापयामि। अपि च, येन प्रकारेण लोक-संग्रह-रीत्या च स: अशेष-क्षेत्रस्य जनान् संयोज्य कार्यमेतत् जनान्दोलनत्वेन परिवर्तितवान्, एतत्तु स्वप्रकारकं प्रेरकम् उदाहरणं वर्तते।

भ्रातर: भगिन्य: च ! अद्य अपरामेकां प्रसन्नतां भवद्भि: साकं संभक्तुं वाञ्छामि। ‘स्वच्छ-भारताभियान’ स्य सन्दर्भे ‘रियासी-ब्लोक्-विषये वदामि’ अहं सूचित: यत् रियासी-ब्लोक् इति श्शव्दद्वठ defecation free अर्थात् अनावृत-शौच-क्रिया-मुक्तम् अजायत। अहं रियासी-ब्लोक-क्षेत्रस्य सर्वान् अपि नागरिकान् तत्रत्यान् प्रशासकान् च जम्मू-कश्मीरेण उत्तमम् उदाहरणं स्थापितम् इति कृत्वा तान् सर्वान् वर्धापयामि। अहम् संसूचित: यत् अस्य आन्दोलनस्य सर्वाधिक-नेतृत्वं विहितं - जम्मू-कश्मीरस्य तत्-क्षेत्रीय-महिलाभि:। ताभि: जागृति-प्रसारार्थं स्वयम् अग्नि-शिखा-यात्रा: आयोजिता:। प्रति-गृहं प्रति-प्रतोली च गत्वा ता: जनान् प्रेरितवत्य:। एता: मातर: भगिन्यश्च मया हृदयेन अभिनन्द्यन्ते। तत्रस्था: प्रशासका: अपि वर्धाप्यन्ते। ये हि जम्मू-कश्मीर-भूमौ ब्लोक-इति क्षेत्रमेकं open defecation free- इति अनावृत-शौच-क्रिया-मुक्तं कृत्वा उत्तमारम्भं विहितवन्त:।

मम प्रिया: देशवासिन: ! विगतेभ्य: पञ्चदश-दिनेभ्य: वा एक-मासात् वा दैनिक-वार्ता-पत्रेषु, श्रव्य-वाहिकासु सामाजिक-संचार-माध्यमेषु च प्रवर्तमान-प्रशासनस्य वर्षत्रयस्य कार्यजातं समीक्ष्यते। वर्षत्रय-पूर्वं भवन्त: मह्यं प्रधान-सेवकस्य दायित्वं दत्तवन्त:। अनेकानि सर्वेक्षणानि विहितानि, बहुविध: च opinion poll- इति अभिप्राय-संग्रह: जात: । अहं संपूर्णामपि प्रक्रियां सुतरां स्वस्थ-संकेत-रूपेण परिभावयामि । प्रत्येकमपि निकषत्वेन वर्ष-त्रयस्य कार्यकाल: परीक्षित: । समाजस्य प्रत्येकमपि वर्गस्य जनै: अस्य विश्लेषणं कृतम्, अथ च, लोकतन्त्रस्य एषास्ति - उत्तमा प्रक्रिया। स्पष्टतया चाहं स्वीकरोमि यत् लोकतन्त्रे प्रशासनानि उत्तरदायीनि स्यु:। जनता-जनार्दनस्य सम्मुखं स्वीय-कार्याणां विवरणं उपस्थापनीयम्। अहं तेभ्य: सर्वेभ्य: साधुवादान् वितरामि, ये हि अस्माकं कार्याणि गभीरतया समीक्षितवन्त:। कुत्रचित् प्रशंसा जाता, कुत्रचित् एतानि कार्याणि समर्थितानि, कुत्रचित् च न्यूनता प्रदर्शिता, एतेषां तथ्यानां महत्वम् अनुभवामि। तेभ्योऽपि साधुवादान् ददामि ये हि समीक्षात्मिकां महत्वाधायिनीं च प्रतिक्रियां प्रादु:। या: त्रुटय: भवन्ति, न्यूनता: वा सन्ति, ता: अपि यदा प्रकाशम् आनीयन्ते चेत् तासां परिष्कारस्य अवसरो लभ्यते। विषयो भवतु नाम समुचित: वा न्यून-समीचीन: वा अप्रिय:, यो हि कश्चन भवेत्, तस्मादेव शिक्षणीयं वर्तते। तदाधारेण एव अग्रेसरणीयम्। रचनात्मिका समीक्षा हि लोकतन्त्रं संबलयति। प्रबुद्ध-राष्ट्रस्य कृते, चैतन्य-पूर्ण-राष्ट्रस्य कृते एतादृक्-मन्थनम् अतितराम् आवश्यकं भवति।

मम प्रिया: देशवासिन: ! अहमपि भवत: इव एक: सामान्य: नागरिकोऽस्मि। तथा च, सामान्य-नागरिकत्वेन प्रत्येकमपि उचितानुचित-वस्तो: प्रभाव: मयि अपि तादृश: एव भवति यथा कस्मिन्नपि सामान्यस्य नागरिकस्य मनसि भवति।

‘मनोगत’ मिति कार्यक्रमं कश्चन एकपक्षीय-संवादत्वेन परिगणयति, केचन राजनीतिक-दृष्ट्या टीकां टिप्पणीञ्चापि कुर्वन्ति, परञ्च सुदीर्घानुभवानां पश्चात् अनुभवामि यत् मया यदा मनोगतमिति आरब्धम्, तदा मयापि नैव विचारितमासीत् यत् कार्यक्रमोऽयं मां भारतस्य प्रत्येकं कुटुम्बस्य सदस्यरूपेण परिचिन्हितं विधास्यति। एवं प्रतीयते यत् अहं परिवारे एव सहैव उपविश्य गृहवार्तां करोमि, अपि च नैक-सहस्रं कुटुम्बानि सन्ति यै: लिखित्वा एतत् विषय-वस्तु प्रेषितम्। तथा मया उक्तं - सामान्य-मानवरूपेण मम मनसि अपि एतत् प्रभवति, पुन: दिवस-द्वय-पूर्वं राष्ट्रपति-भवने आदरणीय: राष्ट्रपति:, आदरणीय: उपराष्ट्रपति:, आदरणीया लोकसभाध्यक्षा-महाभागा चेति सर्वे अपि ‘मन की बात’ इत्यस्य विश्लेषणात्मक-पुस्तकस्य समारोहं आयोजितवन्त: ‘सामान्य-व्यक्ति-रूपेण, सामान्य-नागरिकत्वेन एषा घटना ममोत्साहं विवर्धयति’ अहं राष्ट्रपति-वर्याय, उपराष्ट्रपति-वर्याय लोक-सभाध्यक्ष-महोदयायै च कार्तज्ञ्यं निवेदयामि यदेते वरिष्ठ-पदासीना: सन्तोऽपि समयं निष्कास्य ‘मन की बात’ इत्यस्मै महत्वं प्रादु:। वस्तुतस्तु एवंप्रकारेण ‘मन की बात’- इत्यस्मै स्वयमेव नूतनम् आयामं प्रदत्तवन्त:। मम कानिचन मित्राणि ‘मन की बात’- इति पुस्तकोपरि कार्यं कुर्वन्त: आसन्, तदा मया साकमपि चर्चां कृतवन्त:। किञ्चित्-काल-पूर्वं एषा चर्चा पुन: प्रकाशम् आगता, तदा अहं आश्चर्यम् अन्वभवम् यत् अबु-धाबी-वास्तव्य: चित्रकार: अकबर-महोदय: स्वीय-कला-माध्यमेन ‘मन की बात’-विषयोपरि रेखाचित्राणि निर्मीय प्रदातुं प्रास्तवीत्। अपि चैतदर्थं न किमपि रूप्यकं स्वीकृत्यैव स्वीय-प्रेमाभिव्यक्तये अकबर-महोदय: मनोगतस्य विषयं कलारूपेण ख्यापितवान्। अहं अकबर-महोदयस्य कार्तज्ञ्यम् आवहामि।

मम प्रिया: देशवासिन:! आगामिनि काले यदा वयं पुन: मेलिष्याम: तदा देशस्य प्रत्येकमपि कोणे वृष्टि: पतिता स्यात्, परीक्षाणां परिणामा: प्रकाशिता: सम्भवेयु:, नूतनारम्भत्वेन विद्या-जीवनस्य आरम्भ: भवेत् तथा च, वृष्टि-पातेन सहैव अभिनवां सुरभिम्, नवीनं सुगन्धं चानुभविष्याम:।

आगच्छन्तु ! वयं सर्वेऽपि अस्मिन् परिवेशे प्रकृतिं प्रति प्रेमाणं व्यक्तीकुर्वन्त: अग्रेसराम:‘ भवद्भ्य: सर्वेभ्य: मम भूरिश: हार्दिक्य: मङ्गल-कामना: !! धन्यवादा: !!!

# पेन्ना-मधुसूदनविरचितम् देवरातवैभवम्

-प्रो. पेन्ना मधुसूदनः
अधिष्ठाता, दर्शनविभागः
कविकुलगुरु-कालिदास-संस्कृतविश्वविद्यालयः,
रामटेकम्

या देवी बोधरूपेण मद्बुद्धिमधितस्थुषी।
सदा मां प्रेरयेद् वाचा तया तामेव संस्तुवे।।1।।

ध्याने ब्रह्मसमत्वमाप्य परमां शान्तिञ्च लब्ध्वा ततो
वाग्देवीचरणारविन्दकुसुमं विन्यस्य देहं पुरा।
गङ्गानिर्झरसंनिपातसदृशं वाचो विलासं परं
संप्राप्योत्तमकीर्तिमापुरमरा धन्या मुनीन्द्रा भुवि।।2।।

व्यर्थस्वार्थविचिन्तनेन हृदयं दुष्टं न तेषां ततः
स्वात्मैवेदमभूत् सदा शमवतां तेषां समस्तं जगत्।
तस्मात् ब्रह्मविलक्षणं जगदिदं नोद्भाति सल्लक्षणं
येषां ते खलु भूषणानि जगतां जीवन्विमुक्ता नराः।।3।।

प्राचीनान् मुनिराज एव गुणवान् वृत्त्या प्रवृत्त्या च यान्
आवाह्यात्मनि जीवतीव सततं योऽभान्मुनीन्द्रो भुवि।
तस्योदात्तगुणान्वितस्य चरितं ज्ञेयं समस्तैर्नरै-
रित्यालोच्य करोमि काव्यरचनाबुद्धिं न गर्वेण भो।।4।।

देवरातमौनिराज-जीवनं सुनिर्मलं
देवभाषया महद् गातुमेवमुत्सहे।
व्यक्त-धर्म-शून्य-दिव्य-तत्त्वबोधने हि मे
सच्चरित्रमेव दिव्यसाधनं महद् धनम्।।5।।

गोकर्णभूमिर्भुवनेऽतिरम्या
धन्या सतां जन्मफलेन दिव्या।
नित्योदितैर्नैगमशब्दपूगैः
संपाविता राजति भारतेऽस्मिन्।।6।।

मखैरसंख्यैर्नियतं प्रतप्ता
व्रतं सदेषाऽचरतीव भाति।
अत्रत्यजीवाद्यततिर्मखैर्हि
नित्यादृता धूमलतेव भाति।।7।।

मन्त्रोच्चरद्भूमिसुराः प्रकामं
शाब्दं महो व्योमनि दीपयन्ति।
गोकर्णदेशोऽपि सुकर्णमाप्य
स्पष्टाक्षरं तच्छ्रुणुतेऽतिरम्यम्।।8।।

गृहे गृहे नैगमिका नगर्या-
मस्यां पुनन्तो भुवनं विभान्ति।
सत्कीचका मारुतसूक्तपूर्णा
सोकर्ण-कर्णोत्पलतां व्रजन्ति।।9।।

बुधेन्द्रयुक्ता नगरी सदैव
बृहस्पतीभैरमरावतीव।
कल्पैरनल्पैस्तरुभिर्विभान्ती
नाकं न कं देशमियं विदध्यात्।।10।।

आपाण्डुराभा श्रुतिधर्मराजा
पूर्णाऽर्जुनैर्वृक्षगणैर्न भीमा
गोकर्णभूमिर्नकुलैर्विकीर्णा
चित्राद्भुताभा सह देवभूमिः।।11।।

मौनीन्द्रवर्यैर्धृतराष्ट्रकान्तिः
श्रिताऽप्यनेकैः शकुनीशवृन्दैः।
गोकर्णभूर्भारतसारभूता
चकास्ति लोकोत्तरकान्तियुक्ता।।12।।

यज्ञेषु दीक्षानिरतैरयत्नं
प्रोच्चारिता वज्रसमानमन्त्राः।
तत्रत्यलोकान् पवितुं समर्थाः
कर्णेषु पीयुषमिव स्रवन्ति।।13।।

मातुः पृथिव्याः प्रथिमानमेषा
व्यातन्वती मन्त्रपवित्रशब्दैः।
गोकर्णभूमिर्वितता पृथिव्यां
तद्दक्षिणे दक्षिणकर्णतुल्या।।14।।

तत्कर्णभूषायितविप्रगेहे-
ष्वनन्यसाधारणकीर्तियुक्तः।
कश्चित् कुटुम्बः श्रुतिमात्रबुद्धि
र्वसन् विरेजे विरतान्यबुद्धिः।।15।।

वंशः पवित्रः खलु कौशिकानां
परम्पराप्राप्तयशोधनोऽधनी।
यज्ञोप्तबीजाप्तफलादनेन
स्वजीवनं धन्यतमं चकार।।16।।

सुगन्धवज्जातिसुमोदितात्मा
जज्ञे महाँस्तत्र गुणाब्धिरेकः।
विघ्नेश्वरार्यः कलिदोषनाशं
कर्तुं स्ववेदप्रभयाऽभयार्थम्।।17।।

तत्पुत्ररूपेण महाविभूति-
र्नित्याऽपि जज्ञे सकला हि काचित्।
तं देवरातं पितरौ वदन्तौ
कार्तज्ञ्यभावं हृदये व्यधत्ताम्।।18।।

भिन्नेषु सर्वत्र यथैकसूत्रं
विभ्राजतेऽद्वैतमिहोत्तमं यत्।
तदेव तस्मिन् निलयेऽद्वितीयं
तत्त्वं विरेजे नररूपमाप्य।।19।।

वेदाङ्गगोष्ठी निगमान्तचर्चा
स्मार्तार्थसंपिण्डनशास्त्रचर्चा।
बभूव नित्यं भगवत्समर्चा
तदीयगेहे रुचमावहन्ती।।20।।

माता तदीया हितमात्रचित्ता
वित्ता चतुर्भिः पुरुषार्थकैः सा।
पुत्रं स्वधर्मे विनियोजयन्ती
सन्तोषमाप्नोत् स्वहितं विदन्ती।।21।।

ब्रह्माधिकारं समवाप्य बालः
गायत्रविद्याविरजो बभूव।
काले प्रसूः कालवशेन पुत्रं
विहाय नाकं सुमुखी जगाम।।22।।

कृशानुतेजा निशितस्वभावो
बालोऽपि गूढान् विषयान् विवेद।
सद्योऽपि जातो न जहाति वह्नि-
र्ज्वलत्स्वभावं भुवनेषु रूढम्।।23।।

पितुः सकाशात् विधिवत् स शास्त्रा-
ण्यधीत्य सर्वाण्यपि गर्वहीनः।
माधुर्यपूर्णं फलमाप्य धन्यो
ननन्द पुंस्कोकिलवत् स्वभाग्ये।।24।।

श्रीकृष्णभट्टो निगमार्थवेत्ता
तं पाठयामास त्रय्यार्थसारम्।
श्रीरामदासाख्यगुरुः कृपाब्धि-
रपाठयत्तत्त्वरहस्यमेतम्।।25।।

बलवन्तरावो हठयोगवेत्ता
तं बोधयामास विशिष्टयोगम्।
तेनात्मबोधोन्मुखतामवाप्य
प्रीतो वभावात्मनि देवरातः।।26।।

टेम्बेमहाराजकृपाविशेषात्
पश्चाद्विशिष्टं समवाप बोधम्।
स सर्वदा ध्यानपरीतचित्तो
दध्यौ महेशं जनुषो हिताय।।27।।

क्वचित् पुरं दिव्यविभूतिरेका
श्रीकाव्यकण्ठाग्रगणेशनाम्नी।
एयाय चैत्तं वृजिनं निहन्तुं
व्याख्यानगङ्गामतनोत् सदर्थाम्।।28।।

तं गुरुं शास्त्रविदं गणेशं
सोऽमंस्त विज्ञो मुनिदेवरातः।
श्रीकाव्यकण्ठस्य पवित्रपादौ
भक्त्या शरण्यौ शरणं जगाम।।29।।

स दृष्टिपातं गणपो विवेद
श्रद्धां तदीयां निशितां मनीषाम्।
तेजोविशेषञ्च ततो महात्मा
तं पाठयामास श्रुते रहस्यम्।।30।।

अद्वैतवेदान्तनिगूढतत्त्वं
तदीयचित्ते सहसा प्रविष्टम्।
क्षणेन स ब्रह्ममयं समस्तं
साक्षाच्चकारात्र जगत् समस्तम्।।31।।

वाशिष्ठ गोत्रोद्भवमौनिवर्यो
बभूव योगी गणपो विशिष्टः।
स मन्त्रदीक्षापरमोऽभिरामो
बभौ कलेश्चोपरमोऽपि तस्मिन्।।32।।

एनः प्रजानां निशितामलाभि
र्वाग्भिः प्रधीशः परिहर्तुमैष्ट।
गोभिर्द्युरत्नं जगतां तमिस्रां
निराचिकीर्षुर्भुवमाजगाम।।33।।

सर्वेन्द्रियाणां गतिमात्मधृत्या
निरुध्य चित्तं च वशे विधाय।
आत्मानमेवात्मबलेन धीमान्
प्रविष्ट आसीद्यमिनां वरेण्यः।।34।।

तदा विलीनं मन एकरूपे
संविन्मये केवलचित्स्वरूपे।
भूमेरधस्तात्प्रवहज्जलौघो
भित्त्वा हि काले बहिरेति वेगात्।।35।।

काले च पक्के हृदये प्रसुप्ता
प्रोत्तस्थुषी काचन दिव्यशक्तिः।
दण्डाहता नागवधूर्यथोच्चैः
प्रसारयेत् स्वं फणजालमग्रे।।36।।

तथा तदीयोग्रतपोविपाके
प्राणाहता शक्तिरनूनवेगा।
कन्दात् समुत्थाय विवेश तूर्णं
मूर्धानमापूर्य तनुं स्वभासा।।37।।

विवेद तां कुण्डलिनीतिशक्तिम्
तन्त्रादिशास्त्रेषु गूढां विशिष्टाम्।
ततः परं तस्य सुवर्णशक्तिः
संवर्धिताऽसीत् परमेशभक्तिः।।38।।

तस्मात् दिनात् काचन दिव्यशक्ति-
स्ततान योगीन्द्रतनौ प्रणुन्ना।
बाणो यथोग्रो धनुषः प्रयातो
लक्ष्योन्मुखो याति समिद्धतेजाः।।39।।

नवेन्दुभासा प्रविभासमानो
बालोऽपि योगी विरराज भूत्या।
ग्रीष्मे प्रचण्डांशुतिर्विभास्वान्
बालोऽपि तेजस्वितया विभाति।।40।।

क्वचिन्महेन्द्राद्रिगुहासु योगी
ध्यानस्थिरः केवल आस मौनी।
श्रीकाव्यकण्ठं गुरुमेत्य विज्ञो
योगाय भक्त्या सदयं ययाचे।।41।।

तं केवलं मानस मन्दिरे मे
निधाय योगाय प्रवर्तितोऽस्मि।
स एव मे योगबलस्य हेतुः
स एव दद्यात् फलमस्य तूर्णम्।।42।।

इत्थं विनिश्चित्य गुरोः पुरस्तात्
पद्मासनस्थो निमिमील नेत्रे।
तदा प्रलीने करणप्रवेगे
मनोऽपि शीघ्रं हि बभूव नष्टम्।।43।।

संविद्द्युरत्नेन तदा समाधौ
द्वैतान्धकारे सहसा विदीर्णे
तपःफलं प्राक्तनपुण्यरूपं
योगात्मनाऽसीन्मुनिदैवराते।।44।।

अस्तीतिनिर्देष्टुमशक्यतत्त्वं
नास्तीति नैव प्रतिषेध्यरूपम्।
तस्मादनिर्वाच्यमितीह वेद्यं
द्वैतं तदाऽभूत् क्रमशो विशीर्णम्।।45।।

नाहं न मे नैवमिदं द्वितीयं
चैतन्यमेकं गतसर्वभेदम्।
स्फुरत्स्वभासं सततोदितं च
व्याप्यत्वहीनं गगनोपमञ्च।।46।।

नासीत्तदा कालभिदा न देशः
स्वपूर्णरूपेण रराज तेजः।
तदात्मतेजः कथितं महद्भि-
र्वेदान्तविद्भिस्त्वपवर्गरूपम्।।47।।

तदात्मभासा प्रविभासमानो
वसन्महेन्द्राद्रिशिरःप्रदेशे।
भाति स्म लोकोत्तरभानयोगात्
नभोविताने स शशीव मौनी।।48।।

स देवरातोऽद्रिशिखाप्रदेशे
ब्रह्मेव रेजे निगमान्तशब्दे।
योगीन्द्रवाचीव सदर्थतत्त्वं
महेन्द्रमूर्ध्नि प्रबभौ स योगी।।49।।

दिवा द्वितीयो रविरद्रिमूर्ध्नि
प्रभाति किं शीतलकान्तियुक्तः।
रात्रौ तथा पर्वतमस्तकाग्रे
द्वितीयचन्द्रः प्रविभाति किं नु।।50।।

दूराज्ज्वलद्वह्निसमं हि तेजो
वीक्ष्याद्रिगर्भोत्थमिवाग्निपुञ्जम्।
कालान्तकं कालसमं प्रजास्तु
शशङ्किरे पर्वतभेदमारात्।।51।।

गर्भात्तदद्रेरमितानलाभं
तेजो विनिर्गत्य शिरःप्रदेशे।
तिष्ठत् समस्तं जगदेव शीतं
पाटीरगन्धैर्वचसां करोति।।52।।

माहेन्द्रमूर्ध्नीदमपारतेजः
प्रकाशमानं भुवि नित्यतत्त्वम्।
ऐन्द्रं महत्तत्त्वमनन्तवीर्यं
संस्मारयत्यत्र वचोविलासैः।।53।।

वर्षास्वपीदं शमितं न तेजो
धाराप्रपातैर्वचसां समेषाम्।
चित्रं स्वयं शामयतीह दुःखं
तत्त्वं महत् लोकगतिं न याति।।54।।

वज्रायुधं पर्वतमस्तकाग्रे
चकास्ति किं पापविनाशनार्थम्।
दूरादमुं लीक्ष्य जनास्तदेत्थं
शङ्कोत्थवाक्यं त्विदमूचिवांसः।।55।।

सदोदितार्कप्रभयाऽस्य देशे
निशा न जाता किमु तत्प्रजानाम्।
निद्रासुखं तेऽपि विहाय लोका
दिवीनिशं ते प्रययुर्मुनीन्द्रम्।।56।।

दिवैव भास्वान् प्रचकास्ति दीप्तो
निशासु नैवास्ति तदीयबिम्बम्।
दिवानिशं केवलमत्र देशे
विभाति भानुर्भवतापहारी।।57।।

तस्मिंस्तथा भाति गिरेः प्रदेशे
प्रजाः प्रसन्नात्मसुखे ननन्दुः।
ज्ञानोदयो कुत्र तमः प्रभावो
जाड्यं क्व सूर्ये तपतीह चण्डे।।58।।

तस्मिंस्तथा काञ्चनराजतीस्ताः
प्रदर्शयत्येव गतो हि कालः।
क्वचित्तदग्रे गुरुरात्मदीपः
समाधिमग्नश्चिरमास शान्तः।।59।।

व्युत्थानतां प्राप्य गुरुर्महात्मा
शिष्याननाब्जं चिरमालुलोके।
समाधि-सौख्याब्धिगतं प्रसन्नं
तद् वीक्ष्य विज्ञः प्रियमाननन्द।।60।।

अन्ते वसन्तं प्रियमात्मशिष्यं
दूरेऽपि सन्तं जगदान्ध्यतस्तम्।
प्रेम्णा निरीक्ष्याथ गुरोः प्रकाम
मानन्दपूर्णं हृदयं बभूव।।61।।

तं वीक्ष्य शिष्यं गुरुमात्मबोधे
हर्षातिरेकोऽभवद् गुरोस्तु।
स्वभागधेयं पुरतो विराजत्
मत्वा गुरुर्हर्षगुरुर्बभूव।।62।।

तस्मिंस्तथा पश्यति शिष्यवक्त्रं
चित्रं महज्जातमथास्य साक्षात्।
समाधिमग्नस्य मुखारविन्दात्
शिष्यस्य शब्दाः सहसा निरीयुः।।63।।

आकर्ण्य शब्दान् सहसा निरीहो
वेगोत्थितोऽभूद् गुरुरात्मदर्शी।
शिष्यान्तिकं प्राप्य तदीयशब्दान्
शुश्राव धीमान् गुरुरेकबोधी।।64।।

आश्चर्यमासीन्ननु शब्दशैली
वेदार्षिवाचं प्रतिबिम्बयन्ती।
कलौ युगे मन्त्रविदं नवीनं
प्राचीकटन्नूत्नयुगस्य मूलम्।।65।।

चित्वा स्वयं कञ्चन योगिवर्यं
वाग्देवता नन्दति तस्य चित्ते।
तथैव संप्राप्य हि देवरातं
वाणी प्रसन्ना विरराज शुद्धा।।66।।

आकाशमध्ये विचरन् सदैव
वायुर्यथा कीचकमाप्य कञ्चित्।
व्यनक्ति माधुर्यरसप्रवाहं
तथाऽपि तं शुद्धमतिं हि वेदः।।67।।

त एव शब्दाः स च देहयष्टिः
स एव कालः स च योगमार्गः।
कथं वृणीते मुनिराजमेवं
वाग्देवता तस्य तपःप्रसन्ना।।68।।

आचक्षते भाग्यमिति प्रजा यत्
दैवीं कृपां चापि वदन्ति विज्ञाः।
कालप्रभावं निगदन्ति यत् तत्
तदाऽविरासीन्मुनिराजवक्त्रात्।।69।।

रत्नानि कर्णाभरणायितानि
वचांसि संप्राप्य गुरुर्महात्मा।
तत्तत्त्ववेत्ता प्रजहर्ष मौनी
शिष्यस्य भाग्येऽभिननन्द तूर्णम्।।70।।

शब्दान् ततस्तान् सहसा ग्रहीतुं
गुरुः प्रयत्नं विदधेऽर्थवन्तम्।
स एव यत्नः सफलो बभूव
ग्रन्थात्मना लोकहिताय काले।।71।।

ततः स्वयं शान्तवचः प्रवाहे
निर्वृष्टजीमूतरुचिः स योगी।
बभौ पुनर्ब्रह्मणि लीनचित्तो
नन्दन् पुनश्चात्मविलासमात्रे।।72।।

काले तथाऽयं परिणामशून्यः
कैवल्यभागीयपदं समाप्नोत्।
पुनः स्वयं कर्मविशेषयोगे
व्युत्थानचित्तो मुनिराड् बभूव।।73।।

ततः परं वीक्ष्य गुरोर्मुखाब्जं
फुल्लं तदाऽसीत् हृदयं प्रकामम्।
तदीयवाचा प्रसरत्प्रमादो
बभूव तूर्णं मुनिदेवरातः।।74।।

प्रेम्णा महेशेन वचःप्ररोहे
मदीयदेहः करणीकृतो नु।
तृणायमानस्य ममाद्य जन्तो-
र्व्यनक्ति तद्भाग्यफलं विशिष्टम्।।75।।

व्यातन्वदात्मप्रसरन्मयूखो
देहो ममायं खलु धन्यधन्यः।
नास्त्यन्यदाप्तव्यमितोऽपि लोके
महर्षि संदर्शितमार्गभाजा।।76।।

इत्थं विनिश्चित्य गुरोः पदाब्जे
विन्यस्य देहं मुनिदेवरातः।
रोमाञ्चफुल्लं तनुरूपपुष्पं
तस्मै समर्प्याथ कृती बभूव।।77।।

गुरोर्मुखाच्छिष्य मनः प्रपन्नो
मन्त्रस्तु साफल्यमवाप तत्र।
जीमूतगर्भात् समवाप्य शुक्तिं
सन्मौक्तिकं जात इवोदबिन्दुः।।78।।

स्वशिष्यभाग्योदयमीक्षमाणो
गुरुस्तदा मोदपरीतचित्तः।
धन्योऽयमिन्दीवरवक्त्रकान्तिः
शिष्यः स्वयं वेद विशेषवेदी।।79।।

इतःपरं जन्म जगद्धिताय
स्वयं भवेदस्य कृतार्थता च।
इत्थं विचार्यात्मरसप्रमोदी
स काव्यकण्ठो गुरुराननन्द।।80।।

अप्राप्तशब्दो मुनिराजभाग्यं
वाचां परस्तात् खलु विद्यमानम्।
गुरुर्महान् शिष्यमथ प्रपद्य
व्यानक् परिष्वङ्गमुखेन भावम्।।81।।

ततः स्वभाग्योदयफुल्लचित्तो
निनाय कालं मुनिदेवरातः।
शिष्योपशिष्यादिमुखप्रवृद्धा
वाणी तदीया विललास शुद्धा।।82।।

संस्थाप्य संस्थां निगमार्थविज्ञो
वेदार्थतत्त्वं विततान लोके।
वेदार्षितेजःकिरणैः प्रपूर्णां
वाणीं वितेने भुवनस्य भूत्यै।।83।।

क्वचित्तदाऽश्रावि यशो विशिष्टं
शुद्धं महर्षे रमणस्य तेन
अण्णामलै दिव्यगुहासु ब्रह्म
मनुष्यरूपे चरतीति लोके।।84।।

पश्यन् सदा पश्यति नैव किञ्चित्
शृण्वन् पुनर्नैव शृणोति शब्दम्।
नन्दन् सदा चात्मनि निर्विकल्पे
निर्लिप्त एको भवतीह मौनी।।85।।

तद्दर्शनं जन्मफलं व्यनक्ति
क्षेमङ्करं लोकतमोविनाशि।
इत्थं विचार्यात्महिताय तूर्णं
जगाम चाण्णागिरिमेव पूतम्।।86।।

तत् प्राप्य तीर्थं मुनिदेवरातो
जहर्ष भाग्ये रमणस्य रूपे।
ततः परं ध्यानविशेषमग्न
स्तत्त्वार्थदर्शी सततं बभूव।।87।।

इन्द्रः परात्मा जगतां नियन्ता
वेदेषु सत्यं प्रतिपादितं तत्।
पौराणिका विष्णुशिवादयोऽपि
प्रपूज्यमाना गुणतां व्रजन्ति।।88।।

ज्ञातस्य तत्त्वस्य यथार्थतायाः
प्रमाणमेकं प्रवदन्ति सन्तः।
ध्यानानुभूतिः परमा मुनीनां
प्रमाणमेतत् स्थिरतत्त्वबोधे।।89।।

वेदान्ततत्त्वं समवाप्य शाब्दं
युक्त्या विनिश्चित्य तदीयसारम्।
ततः परं ध्यानबलेन योगी
तदेव साक्षात्कुरुतात् विशुद्धम्।।90।।

यत्तत्त्वमस्यां विततं जगत्यां
तदीशतत्त्वं विनिगम्य बुद्ध्या।
ईशा हि वास्यं जगदीशसृष्टं
त्यागेन भोगं श्रुतिराह योग्यम्।।91।।

न भेदबुद्धिः प्रभवेन्नराणां
न मोहहेतुर्भवताज्जगच्च।
यमादि-योगाङ्गबलेन जन्तो
र्मनो विशुद्धं भवतीह नूनम्।।92।।

भेदप्रकाराः बहवो जगत्यां
न भेदबुद्धिर्जगतो हिताय।
शनैः शनैर्भेदधियं विहाय
स्थिरो भवेत् केवल एव योगी।।93।।

एतां स्थितिं प्राप्य ततश्च योगी
निरन्तरं तत्र रमेत युक्तः
ततो गुणाः प्रेमदयादिकाः शुभाः
समुद्भवन्त्येव तदीयचित्ते।।94।।

निःस्वार्थबुद्धिः करुणा ह्यहिंसा
दया च मौनञ्च समत्वमेवम्।
भक्तिः परेशे स्वयमेव जाता
भवन्ति सर्वे स्वयमेव योग्ये।।95।।

यज्ञो नराणां विधिवत् कृतो हि
कृतज्ञतां वक्ति पुरः सुराणाम्।
श्रद्धासमिद्यज्ञकृतो जगत्या-
मनागसो यज्ञफलं सदुक्तम्।।96।।

न कर्म मोक्षाय च शङ्करोक्तं
मिथ्याभिमानेन कृतं हि वेद्यम्।
आज्ञानभानं विहितं सुकर्म
प्रहापयेन्मोहचयं नराणाम्।।97।।

ज्ञानं पुनश्चात्मविनिश्चयेन
दृब्धं भवेन्मोक्षफलस्य हेतुः।
भक्तिर्द्रुतेः कारणमस्ति वेद्या
ततः स्वयं सर्वफलप्रसूतिः।।98।।

वेदान्तवाक्यैर्विदितेऽपि तत्त्वे
साक्षात्कृतिर्नैव भवेद् विशिष्टा।
ध्यानं ततः सेव्यमितः प्रजाभिः
पारोक्ष्यदोषं प्रहिणोति योगः।।99।।

एवं त्रिधा योगगतिं विजानन्
साक्षात्कृतिं विन्दति योगिवर्यः।
ततः स बन्धाद् विमुच्यते हि
कैवल्यभागीयपदं च विन्ते।।100।।

धानुष्कहस्ताद् विनिमुक्तबाणो
यात्येव वेगोच्चलितः पुरस्तात्।
नष्टे तु वेगे पततीह बाण-
स्तथैव संस्कारबलेन देहः।।101।।

एवं विजानाति नरो य एकं
तत्त्वं ततः शान्तमना भवेद्धि।
निर्मुच्यते पूर्णतयैव बन्धात्
ब्रह्मैव सर्वत्र समीक्षमाणः।।102।।

इत्थं विचारामृतमत्र लोके
वितत्य धन्यो मुनिदेवरातः।
काले तु पक्के तनुपुष्पमत्र
स्वयं जहौ ब्रह्म बभूव चान्ते।।103
।समाप्तं देवरातवैभवम्।।


ओ३म्
भारत में फैले सम्प्रदायों की निष्पक्ष व तार्किक समीक्षा के लिए उत्तम कागज, मनमोहक जिल्द एवं सुन्दर आकर्षक मुद्रण
(द्वितीय संस्करण से मिलान कर शुद्ध प्रामाणिक संस्करण)
सत्य के प्रचारार्थ
सत्यार्थ प्रकाश
सत्य के प्रचारार्थ

| | | | |
|---|---|---|---|
| ● प्रचार संस्करण (अजिल्द) 23×36÷16 | मुद्रित मूल्य 50 रु. | प्रचारार्थ 30 रु. | प्रचारार्थ मूल्य पर कोई कमीशन नहीं |
| ● विशेष संस्करण (सजिल्द) 23×36÷16 | मुद्रित मूल्य 80 रु. | प्रचारार्थ 50 रु. | |
| ● स्थूलाक्षर सजिल्द 20×30÷8 | मुद्रित मूल्य 150 रु. | | प्रत्येक प्रति पर 20% कमीशन |

10 या 10 से अधिक प्रतियाँ लेने पर विशेष अतिरिक्त कमीशन
कृपया, एक बार सेवा का अवसर अवश्य दें और महर्षि दयानन्द की अनुपम कृति सत्यार्थ प्रकाश के प्रचार प्रसार में सहभागी बनें
आर्ष साहित्य प्रचार ट्रस्ट
427, मन्दिर वाली गली, नया बांस, दिल्ली-6
Ph. :011-43781191, 09650622778
E-mail : aspt.india@gmail.com

# आचार्यवासुदेवद्विवेदिशास्त्रिणां स्मृतिमहोत्सवो हर्षोल्लासपूर्वकमायोजितम्

वाराणसी 26मई17 चित्रसेनतिवारी- अद्य प्रतीचीप्राचीसर्वविद्याराजधान्यां विमलसलिलवत्याः गंगायास्तटे धूर्जटेः सकलपापहरस्य भगवतः शिवस्य पुर्यां काश्यां प्रथितकीर्तिलताप्रतानानां सार्वभौमसंस्कृतप्रचारसंस्थानसंस्थापकानां नित्यवन्दनीयचरणकमलानाम् अमरसदृशानाम् आचार्यवासुदेवद्विवेदिशास्त्रिणां स्मृतिमहोत्सवो हर्षोल्लासपूर्वकमायोजितस्तेषां कृतज्ञैरन्तेवासिभिः।







प्रथमसत्रे प्रोफेसरकृष्णकान्तशर्ममहोदयानाम् भवने एष स्मृतिमहोत्सवो विदितवेदितव्यानां प्रतिकुलपितचराणाम् आचार्यशिवजीउपाध्याययमहोदयानाम् आध्यक्ष्ये, महाकविशिरोमणितिलकानां कुलपतिचराणां सतां यशोधनानाम् अभिराजराजेन्द्रमिश्रमहोदयानां मुख्यातिथित्वे, सम्पन्नोऽभूत्। प्रोफेसरशिवजीउपाध्यायमहोदया न्यगदन् यत् आचार्यवासुदेवद्विवेदिमहोदयैः संस्कृतप्रचाराय यादृशं योगदानं जगति कृतं तन्नूनमेवाविस्मरणीयमस्ति, तेषां संस्कृतानुरागो दर्शनीय आसीत्। वाराणसीस्थविश्वविद्यालययोस्तेषां स्थापिता भवेदासन्दिकैका, यया सर्वोऽपि जनो जानीयात् तेषां विषये, अध्यक्षवरैरुपाध्यायमहोदयैः मुहुर्मुहरन्तेवासिनः प्रशंसिताः।

अवसरेऽस्मिन् पावने मुख्यातिथिपदमलंकुर्वाणाः अभिराजराजेर्न्द्रमिश्रमहोदया अभाषन्त, यद् आचार्यवासुदेवद्विवेदिसदृशो गुरुरनुपलब्ध इदानीम्। निस्स्वार्थभावनया सुरभारतीप्रचारणं तेषां जीवनस्य लक्ष्यमतिष्ठत्। लघु-लघुसरलसुबोधसंस्कृतप्रचारतत्पराणि पुस्तकानि विरच्य पूज्यपादैः संस्कृतस्य महान् प्रचारः कृतः। प्रोफेसरमिश्रमहोदयैर्निगदितं यत् आचार्यवराणां वासुदेवद्विवेदिनां याः सन्ति रचनाः, ताः सर्वा अपि एकस्मिन् ग्रन्थे प्रकाशनीया अस्माभिः, येन देशे देशान्तरे च तेषां संस्कृतप्रचारः प्रसरेत्। एभिरुक्तं यद् धन्यास्त एवाचार्या भवन्ति येषामन्तेवासिनः तान् श्रद्धया संस्मरन्ति। तैरनेकानि वन्द्यद्विवेदिमहोदयैस्साकं साक्षात्कृतानि संस्मरणानि श्रावितानि, यानि चेतोहराणि आसन्।

विश्वस्मिन् अद्वयो द्विवेदिमहोदय आसीदितिधिया तेषां स्मृतिमहोत्सवे विद्वत्त्रयी आचार्यवासुदेवद्विवेदिसम्मानेन सम्मानिता अभूत्। सुकवयः डॉ महेशझामहोदयाः, कविवराः डॉ राजेन्द्रत्रिपाठी रसराजः, आशुकवयः श्रीप्रेमशंकरशर्ममहोदयाश्चेति विद्वद्भिः आचार्यवासुदेवद्विवेदिशास्त्रिसम्मानेन सम्मानिता अभूवन्। सम्माने एकम् उत्तरीयम्, अद्यापिकाव्यम्, वासुदेवचरितम् इति प्रदत्तम्।

विद्वत्सम्मानक्रमे एव कविवरराजेन्द्रत्रिपाठिरसराजविरचित-



रसराजतोषिणीति काव्यस्य विमोचनं प्रोफेसरशिवजीउपाध्यायमहोदयानां महाकवीनाम् अभिराजराजेन्द्रमिश्रमहोदयानां करकमलैरभवत। सुधीभिः प्रशंसिताः रसराजमहोदयाः। अत्रान्तरे आचार्यवराणाम् अन्तेवासिनः अतिथिभ्यः स्वपरिचयमयच्छन्, यत्र गुरुभक्तिरदृश्यत। अन्तेवासिषु डॉ शरदिन्दुत्रिपाठि- डॉप्रतापमिश्र- डॉसरोजपाण्डेय- श्रीसन्तोषचतुर्वेदि- श्रीशम्भुतिवारी- श्रीसचिनतिवारिणश्चान्ये आसन्। प्रथमसत्रस्य संचालनं डॉ अरविन्दकुमारतिवारिणा कृतम्। कार्यक्रमस्यारम्भः काजलओझा- छायाशुक्ला-ऋतुपाठकप्रभृतिभिः संगीतच्छात्राभिः 'निनादय नवीनामये वाणि वीणामिति भगवतीसरस्वतीगानेन मंगलाचरणेन जातः। स्वागतगानं श्रीशम्भुतिवारी श्रीसचिनतिवारी च कृतवन्तौ, स्वागतभाषणं च प्रोफेसरकृष्णकान्तशर्मणा कृतम्। अस्मिन् सत्रे महाकविप्रणवविरचितं कविता वनिता इति बालिकाभिः गीतम्।

द्वितीयसत्रे पूज्यचरणानाम् आचार्यवासुदेवद्विवेदिमहोदयानां कविगोष्ठीप्रियाणां स्मृतौ कविगोष्ठी समायोजिताभूत्। कविगोष्ठ्या आरम्भः वन्दनीयडॉस्वरवन्दनाप्रशिक्षितछात्राभिः महाकविजयदेवविरचितदशावतारस्तवनेनाभूत्। यत्र महाकवयः अभिराजराजेन्द्रमिश्रमहोदयाः सरसं सुमधुरं काव्यमपठन्। महाकवयः अध्यक्षवराः प्रोफेसरशिवजीउपाध्यायमहोदयैर्मनोहारिकाव्यं श्रावितम्। अस्यां कविगोष्ठ्यां आचार्यविन्ध्येश्वरीप्रसादमिश्रमहोदयाः, आचार्यराजारामशुक्लमहोदयाः, डॉमहेशझामहोदयाः, डॉराजेन्द्रत्रिपाठिरसराजमहोदयाः, श्रीप्रेमशंकरशर्मा, डॉ शरदिन्दुत्रिपाठी, डॉ अरविन्दकुमारतिवारी, डॉ शशिकान्ततिवारी, चान्ये काव्यपाठमकुर्वन्। अस्य सत्रस्य संचालनं डॉ धर्मदश्चतुर्वेदिमहोदयैः कृतम्, एभिः गुरुवरविषयकं काव्यमपि श्रावितम्। सत्रद्वयस्यापि धन्यवादज्ञापनं प्रोफेसरकृष्णकान्तमहोदयैः सुधामयैर्वचनैः कृतम्। महोत्सवस्यान्ते आचार्यवासुदेवद्विवेदिमहोदयानां संस्कृतप्रचारस्वरः

नगरे नगरे ग्रामे ग्रामे विलसतु संस्कृतवाणी  
सदने सदेन जन-जन-वदने जयतु चिरं कल्याणी।  
सत्यशीलसौन्दर्यसमीरा ज्ञानजला गतिसारा  
छल-छल- कल-कल -प्रवहतु दिशि दिशि पावनसंस्कृतधारा।

सवैरपि गीतः। अन्ते अमरवाणी विजयताम् इति समुद्घोषेण स्मृतिमहोत्सवः सम्पूर्णतामवाप्नोत्।


खादी वस्त्र ही नहीं, विचार है !

आदर्श ग्रामोद्योग समिति, दिल्ली

खादी वस्त्रों का विशाल भण्डार

✪ सूती खादी व रेडीमेड ✪ ऊनी खादी व कम्बल ( रेडीमेड ) ✪ रेशम साड़ी ( रिल्ड ) ✪ रेशम स्पन व रेडीमेड ✪ पोली खादी

सभी प्रकार की खादी व ग्रामोद्योग उत्पाद जैसे अचार, साबुन, तेल, शैम्पू, शहद ,अगरबत्ती, च्यवनप्राश, त्रिफला आदि के लिये पधारें।

खादी ग्रामोद्योग भवन

✪ 10/105-A, सेक्टर-3, राजेन्द्र नगर, साहिबाबाद, ( उ० प्र० )  
✪ शेरपुर चौक, करावल नगर, दिल्ली-110094  
फोन:-0120-2631855, 9899334204



पाठकानां कृते सूचनाः-

कृपया संस्कृत-संवादः पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुं पञ्चवार्षिकशुल्कं रु ६००/- ( संस्थादीनां कृते ) द्विवार्षिकशुल्क रु. २४०/- ( व्यक्तीनां कृते ) मनिऑर्डरः, चैकः ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां ( A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्-

Sanskrit samvad,  
Current A/C No. 22490200000142,  
Indian Overseas Bank, Yamuna Vihar,  
Delhi-110053  
IFC Code- IOBA0002249



अस्माकं प्रेरणास्त्रोतः- स्व.पं० रामकिशोरशर्मा,  
परामर्शकाः-डॉ.रमाकान्तशुक्लः, डॉ.रवीन्द्रनागरः, डॉ.धर्मेन्द्रकुमारः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः,  
सम्पादिका-मञ्जूशर्मा, उपसम्पादकः- डॉ. सन्नीकुमार, संदीप कुमार उपाध्याय, शुभम् आर्य, प्रबन्धसम्पादकौ- वेदप्रकाशशर्मा, नेहाशर्मा च,



स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया राहुल-ऑफसेट-प्रिंटर्स, 521/8 कृष्णागली सं. 14, मौजपुरनगरम्, देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।  
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-21/5379/2014-16 राष्ट्रियसंस्कृतसंस्थानस्य अनुदानेन प्रकाश्यमानं पत्रमिदम्।